ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

आषाढमासः
वर्षम् – ६८
नवमोऽङ्कः
विक्रमाब्दः २०७५
युगाब्दः ५१२०
५ जुलाई २०१८

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



स्वाध्यायैश्च प्रवचनैः शास्त्राभ्यासैस्तपोवने।
गुरवे प्रणिपातैश्च मान्यते व्यासपूर्णिमा।।

**भारती संस्कृत-मासपत्रिका**

# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | श्रीकृष्णमन्त्रमहास्तोत्रम् | आचार्य पं. नथमलशास्त्री दाधीचः | ७ |
| ५ | भ्रातुः यज्ञोपवीतसंस्कारः | डॉ. हर्षदेव माधवः | ८ |
| ६ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | ८ |
| ७ | केवलं सोऽस्ति मम हस्तोऽयम् | मिश्रोऽभिराजराजेन्द्रः | ९ |
| ८ | अत्रिस्मृतौ योगः शुद्धिः ब्रह्मप्राप्तिश्च | डॉ. उषाकिरणयादवः | १० |
| ९ | स्वच्छविः ( **Selfie** ) | डॉ. हर्षदेवमाधवः | १२ |
| १० | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १३ |
| ११ | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १५ |
| १२ | आधुनिकग्रन्थावलिप्रकाशनोपक्रमाः | प्रधान सम्पादकः | १६ |
| १३ | भारतभूम्याः विभूतयः | अविनाश शर्मा | २० |
| १४ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः | २२ |
| १५ | श्रीमद्वाल्मीकीयरामायणवर्णितं धर्मस्वरूपम् | ओमप्रकाश अग्रवालः | २३ |
| १६ | गीतरामायण-प्रशस्तिः | मिश्रोऽभिराजराजेन्द्रः | २६ |
| १७ | राजस्थानीय संस्कृतसाहित्ये नव्यप्रयोगाः | रिंकू अग्रवालः | २७ |
| १८ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २९ |
| २९ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः



**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयलः

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

रामान्नास्त्यधिकं प्रियो मम कृते तस्मात् वधूं त्वामहम्
सीतारामतयाधुना तव कृते यच्छामि सर्वं प्रियम्।
कैकेयी हिममण्डितं सुभवनं यस्यै ददौ प्रेमतः,
सीताराममतिप्रियं सुचरितं वन्दामहे सादरम्।।

## मासावतरणम्

आयास्यत्यपि सा चिरं सुनयना विद्युत्तरङ्गैः सह
आषाढे सुमुखीस्त्रियः स्वनयनैः पश्यन्ति मेघान् मुहुः।
निर्घोषं च विलोकनैः सुरुचिरं हेम्नः प्रभासंयुता
आयास्ये ह्यचिरं सुखेन विमलां वृष्टिं विधास्याम्यपि।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

आषाढमासः
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2075
जूलाई, 2018
अङ्कः -9
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# लाभकारिण्यो योजनाः सर्वकारस्य

...✍ पं. प्यारेमोहनशर्मा

वैश्विकपरिदृश्ये भारतमातुः मुकुटस्वरूपो उत्तरे हिमालयः पश्चिमे थारधरा पूर्वे त्रिसिन्धु नागाशाहीपर्वत-शृङ्खला दक्षिणे उत्तालतरङ्गमण्डितो हिन्दमहासागर एवं मध्ये ऊनत्रिंशत् राज्यानि सप्त संघशासितप्रदेशाः सांस्कृतिकवैभिन्नतया सह-एकत्व-भावेन वसन्ति त्रिंशदधिकैकशतकोटिसंख्यकाः भारतीयाः (130 करोड़) तेषामयं भारतदेशः। अत्र भवन्ति षड् ऋतवः एभिरेव अत्र सन्ति पूर्णानि प्राकृतिकसंसाधनानि। 1950 वर्षादारभ्याद्यावधि-अष्टषष्टि (68) वर्षेभ्यः संसद आरभ्य पञ्चायतपर्यन्तं विराजते लोकतन्त्रम्।

विश्वस्य विशालतमे लोकतान्त्रिकदेशे सर्वसाधारण-जनानाम् आशा राजनैतिकदलेभ्यो आसन्। जनता आशान्विता आसीत् यत् सम्प्रति देशो दरिद्रतामुक्तः संसाधनसम्पन्नो भविष्यति। नहि कोऽपि बुभुक्षितः शेष्यति न च वस्त्रहीनो कोऽपि दृष्टिपथमायास्यति। एतदर्थं वारद्वयं राष्ट्रीय राजनैतिक कांग्रेसदलाय शासन-सत्तां प्रायच्छत् ततश्च गठबन्धनाय शासनं प्रायच्छत्। किन्तु षष्टिवर्षेभ्यो नहि वाञ्छितं फलमगधितम् जनतया। महर्घताया भ्रष्टाचारस्य कार्याभावस्य (बेरोजगारी) हताशाया असुरक्षाया भावाश्चावर्धन्त। वैदेशिकतुष्टि-करणनीतिभिः त्रिषु युद्धेषु सफलतावाप्त्यनन्तरमपि देशस्य सीमाया अतिक्रमणं तिब्बतस्य कश्मीरस्य च सीमा अपि नाभवत् सुरक्षिता।

दिवंगतप्रधानमन्त्री इन्दिरागान्धितो राजीवगान्धि-पर्यन्तं 'गरीबी हटाओ' दीनतामपाकरोतु देशं रक्षतु घोषाः कर्गदेषु एव व्यलुम्पन् भ्रष्टाचारोऽवर्धत। ततः यू.पी.ए., यू.पी.ए. 2 लक्षकोटिरूप्यकाणां संस्थागतो भ्रष्टाचारः सम्मुखे समागतः। परिणामतो निर्वाचने काँग्रेसदलं पराजयमलभत।

2014 तमख्रिष्टाब्दे पूर्णबहुमतेन भारतीयजनतादलं शासनारूढं संजातम्। नरेन्द्रमोदी महोदयाः प्रधानमन्त्रि-पदमलञ्चक्रुः। नवीनः मोदीसर्वकारः विकासकार्याणि विधास्यतीति विश्वासः समभवत्। एष सर्वकारः सुशासनं संवदेनशीलतां पारदर्शितां च विलोक्य कार्याणि विदधाति। दीनतालक्षितां विकासरूपरेखां शासने प्रशासने च स्थापयितुं यतते। प्रधानमन्त्रिणो नेतृत्वे भारतीय-जनतादलस्य कोटिशः कार्यककर्तृणां सहयोगेन शासन-संघटनयोः सामञ्जस्ये सशक्तभारतस्य पुनर्निर्माणे कृतसंकल्पा अग्रेसरन्ति। शताधिकसंख्यका जनसुविधाः स्मार्ट मोबाइलयन्त्रे समुपलब्धाः साधिताः। केन्द्र-राज्ययोः 400 चतुःशतं योजनानां प्रत्यक्षं प्रदानं विधीयते अस्यां प्रक्रियायां प्रत्यक्षरूपेण लाभार्थिनां राशिग्रहण-सुनिश्चितता जाता। सहैव ८0 लक्षकोटि रूप्यकाणां लाभोऽपि सर्वकाराय प्रत्यक्षमेवामिलत्। अनया सुविधया लोकतन्त्रे लोको जीवितोऽभवत्। मोदीसर्वकारः सपादसप्तकोटि जनेभ्यः शौचालयनिर्माणाय द्वादशसहस्र रूप्यकाणि दत्त्वा शौचालयनिर्माणकार्यमपूरयत्।

निम्नाङ्कितानि प्रशंसनीयानि कार्याणि सम्पादितानि-कन्यां रक्षतु बालिकां पाठयतु। सुकन्यासमृद्धियोजना समारब्धा, कार्यकर्तृभ्यः स्त्रीभ्यः कृते छात्रावासनिर्माण-कार्यं विहितम्। उज्ज्वलायोजनाद्वारा ग्रामीणक्षेत्रेषु बी.पी.एल. परिवारेभ्यो येषां संख्या सपादकोटित्रय-

परिमिता विद्यते तेभ्यो निःशुल्कं रसवती गैसकनेक्शनानि प्रदत्तानि मातृत्वलाभनियमे 26 सप्ताहानां सवैतनिकावकाशः स्वीकृतः। अधुना वर्षद्वयस्यावकाशो यावत् बालकाः बालिका वा अष्टादशवर्षायुष्को न भवेदिति संशोधनं तत्र विहितम् कृषकेभ्यः फसलबीमायोजना समारब्धा। अष्टादशकोटिदीनेभ्यः (10 पैसे) प्रतिदिन प्रीमियमे बीमायोजना समारब्धा। वृद्धजनेभ्यः अटलपेंशनयोजना प्रदत्ता। विगत चतुर्षु वर्षेषु मोदीमहोदयेन यानि कार्याणि समारब्धानि तेभ्यो देशस्य प्रत्यकं वर्गः लाभान्वितः संजातः।

नरेन्द्रमोदीसर्वकारस्य सत्तायां चत्वारि वर्षाणि पूर्णानि जातानि। अस्मिन् काले एनडीए सर्वकारो नरेन्द्रमोदीनेतृत्वे नैका योजनाः प्रारभत यासां लाभः स्पष्टरूपेण भारतीयजनता प्राप्नोति। एष सर्वकारः सर्ववर्गाणां विकासाय सर्वात्मना प्रायतत येन ते स्वकीयामावश्यकतां पूरयितुं समर्थाः स्युः। महिलाविकासवार्ता स्यादथवाल्पसंख्यकानां विकासस्य। मोदी सर्वकारः स्वकीययोजनाभिः सर्वेभ्यः आर्थिकीं सहायतां प्रायच्छत्। वयमत्र प्रदर्शयामः केन्द्रसर्वकारस्य योजनाः।

**1. प्रधानमन्त्रीजनधनयोजना-**

प्रधानमन्त्री नरेन्द्रमोदी 2014 ख्रिष्टाब्दस्य-अगस्तमासस्य 28 अष्टाविंशतितमे दिनाङ्के जनधनयोजनां प्रारभत। अस्या योजनाया घोषणा 2014 ख्रिष्टाब्दस्यागस्तमास्य पञ्चदशे (15) दिनाङ्के स्वतन्त्रतादिवसे रक्तदुर्गतः स्वभाषणे विहिता। एष एको वित्तीयसमावेशकार्यक्रमो विद्यते। कार्यक्रमस्य प्रारम्भे प्रथमे दिने एव सार्धैककोटिसंख्यका ''बैङ्कखाते'' कोषागारे धनपत्राणि संसाधितानि प्रत्येकखाताधारकाय- एक लक्षरूप्यकाणां दुर्घटनाबीमापत्राणि प्रदत्तानि।

**2. स्वच्छभारताभियानम्-**

इदमभियानं 2 अक्टूबर 2014 गान्धीजयन्त्यवसरे समारब्धम्। सम्प्रति-इदं बृहत् जनान्दोलनं संजातम्। स्वयं प्रधानमन्त्री स्वकरे सम्मार्जिकामादाय स्वच्छताकार्यकमरोत्। अनया योजनया 2019 पर्यन्तं सम्पूर्णं भारतं स्वच्छं पूर्णरूपेण संभविष्यति। एतदतिरिक्तं सर्वकारः दूरस्थग्रामीणक्षेत्रेषु शौचालयसुविधां स्वच्छतासुविधां प्रयच्छति।

**3. प्रधानमन्त्री उज्ज्वला योजना-**

एषा योजना महिलासशक्तीकरणदिशायां लोकप्रिया सिद्धयति। अनया योजनया निर्धनग्रामीणपरिवारीयमहिलाभ्यो निःशुल्कं एलपीजी सम्बन्धिता सुविधा प्रदीयते। उज्ज्वलायोजनयाद्यावधि पञ्चकोटिसंख्यकाभ्यः स्त्रीभ्यः निःशुल्कं रसवती गैस (कनेक्शन) सम्बद्धता प्रदत्ता।

**4. प्रधानमन्त्रीआवासयोजना-**

नगरे स्वकीयं गृहं स्यादिति प्रत्येकं जनः अभिलषति। परन्तु भृत्यता- (नौकरी) कर्तारः स्वकुटुम्बमेव वेतनेन पालयितुं सक्षमा भवन्ति। नहि ते गृहं क्रेतुं सक्षमा भवन्ति। प्रधानमन्त्री आवासयोजनाद्वारा सन् 2022 पर्यन्तं सर्वेभ्यो गृहं दातुं प्रधानमन्त्री प्रतिबद्धः संजातः। सम्प्रति सर्वकारः सुमहर्घ (सस्ते) गृहान् निर्माय प्रयच्छति। बैङ्कसंस्थानानि च सरलेन व्याजेन ऋणं प्रयच्छन्ति।

**5. स्टार्ट अप इण्डिया-**

अनया योजनया युवकेभ्यः (स्वरोजगार) स्वकीयमुपार्जनं प्रदत्तम्। प्रधानमन्त्रिणां मोदीमहोदयानां प्रयासैः भारतं स्वरोजगारविषये अमेरिका ब्रिटेन देशयोरनन्तरं

भारतमेव तृतीयो देशः समभवत्। एषा योजना स्वकीयमेव कार्यं कर्तुं युवकान् प्रेरयति। महिला अपि अनया योजनया लाभान्विता भविष्यन्ति। शिक्षिता एम.ए., एम.काम., एम.एस.सी. उपाधिधारिणः सर्वकारे भृत्यत्वं वाञ्छन्ति न च सर्वकारः सर्वेभ्यः सर्वकारीय-सेवां दातुं शक्नोति। अतः अनया योजनया बैङ्केभ्यः ऋणं गृहीत्वा स्वकीयं कार्यं कुर्वन्तु सर्वे युवकाः युवतयश्च। स्टार्ट अप विषये नवीन नीत्यनन्तरं सहस्रकोटिशो रूप्यकाणां निवेशोऽत्र समभवत्। अत्र च महिलावर्गस्य बहुसंख्यायां भागो विद्यते।

**6. प्रधानमन्त्री ग्रामसिञ्चनयोजना-**

वयं कृषकाणां हितैषिणः। इति मोदी सर्वकारो वदति। तदनुसारमेव प्रधानमन्त्रीग्रामसिञ्चनयोजना समारब्धा। अनया योजनया सर्वां कृषियोग्यां भूमिं सिञ्चितुं लक्ष्यं निर्धारितं विद्यते। अस्या योजनायाः सफलताया अनुमानमेतेन ज्ञातुं शक्यते यत् पूर्वं कृषकाः स्वफसल-सुरक्षाबीमा यावत् संख्यायां कारयन्तिस्म सा संख्या सम्प्रति सप्तगुणा अवर्धत। अत एव 2016-18 वर्षेषु अस्याः प्रीमियम प्रदाने 13.2.40 कोटिरूप्यकाणि व्ययी भूतानि। अर्थात् प्रीमियमधनमधिकं प्रदत्तम्।

**7. सुकन्या समृद्धि योजना।**

धनाभावेन ये परिवाराः स्वकीयां कन्यां शिशून् वा अध्ययनसुविधां दातुं न शक्नुवन्ति तेषां चिन्तामपाकर्तुं मोदी सर्वकारः सुकन्यासमृद्धियोजनामरचयत्। अनया योजनया सर्वकारः तेभ्यः छात्रेभ्यः ताभ्यः छात्राभ्यश्च निःशुल्कं शिक्षाप्रदानव्यवस्थां सम्पादयति।

**8. कन्यां रक्षतु कन्यां पाठयतु-**

प्रधानमन्त्री नरेन्द्रमोदी महोदय 2015 ख्रिष्टाब्दस्य जनवरी मासस्य पञ्चविंशतितमें दिनाङ्के हरियाणा प्रदेशस्य पानीपतनगरात् इमां योजनां प्रारभत। शतकोटिरूप्यकैः सह देशस्य शतसंख्याकमण्डलेषु (जिलों में) सैषा योजना समारब्धा। हरियाणा प्रान्ते लिङ्गानुपातं सर्वाधिकं न्यूनं वर्तते। तत्र भ्रूणहत्या समधिकं भवति। इति कृत्वा तत्र समाजे पुत्रीणां महत्वं विज्ञापयितुं एषा योजना ततः समारब्धा।

**9. जीएसटी**

अनया योजनया केन्द्रस्याष्टविधान् करान् तथा राज्यस्तरीयान् नवविधान् करान् समाप्य एक एव करो निर्धारितः। 140 देशेषु एतादृशी करप्रणाली विद्यते। नीतिगतोऽयं महत्त्वपूर्ण निर्णयो मोदीसर्वकारेण विहितः।

**10. आधारः**

आधारप्रमाणपत्रनिर्माणकार्यं मोदी सर्वकारेण सम्पादितम् अनेन यो राशिः यस्य कृते विद्यते स तस्मै एव मिलिष्यति इति सुनिश्चितं संजातम्।

एतदतिरिक्तमपि मोदीसर्वकारेण नैकानि लोकहित-साधकानि कार्याणि सम्पादितानि। यथा-

सप्तसहस्रग्रामेषु सौर-ऊर्जया विद्युदुत्पादनं विधाय ग्रामाः विद्युता विद्योतिताः। सहस्रशो ग्रामेषु जलव्यवस्था विहिता। एकलक्षपंचविशतिसंख्याकाः शौचालया निर्मापिताः। ग्रामेषु यातायातव्यवस्थायै (सडक) राजमार्गा निर्मापिताः। वृद्धेभ्यः पेंशनयोजना समारब्धा। कथनस्यायमभिप्रायो यत् मोदीसर्वकारेण लोकहित-साधकानि यावन्ति कार्याणि विहितानि न तावन्ति कार्याणि अद्यावधि पूर्वतनैः सर्वकारैः सम्पादितानि। गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः। इत्यपि भवत्येव परन्तु एकोहि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः इत्यलम्।

# श्रीकृष्णमन्त्रमहास्तोत्रम्

( श्रीकृष्ण:शरणं मम )

( पूर्वानुवृत्तम् )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

## अथ ध्यानम्- ( वन्दना )

मथुरामण्डले कृष्णः कृष्णो वृन्दावने व्रजे।
निकुञ्जे गोकुले कृष्णः श्रीकृष्णः शरणं मम।। 81।।
धीरो वीरो धराधारो सद्धर्मरक्षको हरिः।
वासुदेवो दयामूर्तिः श्रीकृष्णः शरणं मम।। 82।।
हृदिस्थः सर्वभूतानां जीवरूपः सनातनः।
जगद्धाता जगन्नाथः श्रीकृष्णः शरणं मम।। 83।।
क्षेमाय सर्वलोकानामरूपो रूपवान् विभुः।
सत्त्वरूपः सदा ध्येयः श्रीकृष्णः शरणं मम।। 84।।
भावितान्भजते भक्तान् माधवो भक्तवत्सलः।
नामरूपगुणैर्ज्ञेयः श्रीकृष्णः शरणं मम।। 85।।
श्रुतो भक्त्या स्मृतो गीतः सर्वमङ्गलमङ्गलः।
भक्तवाञ्छाप्रदो देवः श्रीकृष्णः शरणं मम।। 86।।
जगदात्मा जगत्कर्ता जगद्रूपो जगत्पतिः।
जगदीशो जगद्भर्ता श्रीकृष्णः शरणं मम।। 87।।
सच्चिदानन्दरूपोऽयमानन्दाम्बुधिवर्धनः।
सर्वानन्दः सदानन्दः श्रीकृष्णः शरणं मम।। 88।।
योगयोगेश्वरः कृष्णो भगवान् भुवनेश्वरः।
परमात्मा परं तेजः श्रीकृष्णः शरणं मम।। 89।।
सुमुखः सुन्दरग्रीवः सुरूपः सुस्मिताननः।
नीलोत्पलदलश्यामः श्रीकृष्णः शरणं मम।। 90।।
ज्ञानगम्यो गुणातीतो ध्यानगम्यो धियां पतिः।।
जगद्योनिर्जगन्मूर्तिः श्रीकृष्णः शरणं मम।। 91।।
निर्विकल्पो निराधारो निर्विशेषो निराश्रयः।
निरञ्जनो निराकारः श्रीकृष्णः शरणं मम।। 92।।
योगेशो योगमायेशो योगयोनिर्जनार्दनः।
ज्ञानविज्ञानतृप्तात्मा श्रीकृष्णः शरणं मम।। 93।।
अजाऽनन्तोऽव्ययोऽनादिरादिदेवो दयानिधिः।
वेदवेद्यो विभुर्नित्यः श्रीकृष्णः शरणं मम।। 94।।
क्षीराब्धिशयनोऽशेषो मधुकैटभमर्दनः।
पद्मनाभो महाविष्णुः श्रीकृष्णः शरणं मम।। 95।।
शङ्खचक्रगदापद्मधरो विष्णुश्चतुर्भुजः।
वाङ्मनोऽगोचरः सूक्ष्मः श्रीकृष्णः शरणं मम।। 96।।
सर्वज्ञः सर्वगः सर्वः सर्वभूतगुहाशयः।
भक्त्यानुभावितो देवः श्रीकृष्णः शरणं मम।। 97।।
केशवः कमलाकान्तो मनोवाक्कायकर्मभिः।
सेवितो वरदो भक्त्या श्रीकृष्णः शरणं मम।। 98।।
विशुद्धसत्त्वः सर्वेशः स्वेच्छयोपात्तविग्रहः।
दीनबन्धुः दयासिन्धुः श्रीकृष्णः शरणं मम।। 99।।
आत्मारामो रमानाथः पूर्णकामः कलानिधिः।
सर्वकामप्रदो देवः श्रीकृष्णः शरणं मम।। 100।।
सार्वभौमः सुरार्त्तिघ्नः प्रपन्नभयभञ्जनः।
वैकुण्ठो देवदेवेशः श्रीकृष्णः शरणं मम।। 101।।
पुण्यकीर्तिः पराकाशः विश्ववन्द्यो जगद्गुरुः।
भुक्तिमुक्तिप्रदो देवः श्रीकृष्णः शरणं मम।। 102।।
गोपालो गोपिकानाथो गोविन्दो गरुडध्वजः।
गोकुलेन्द्रो गणाध्यक्षः श्रीकृष्णः शरणं मम।। 103।।
पुरुषः सर्वभावज्ञो विश्वमूर्तिरमूर्तिमान्।
सहस्राक्षः समस्तात्मा श्रीकृष्णः शरणं मम।। 104।।
केशवः कामदः कान्तः सत्कीर्तिः सात्त्वतां पतिः।
अनीशः शाश्वतः शान्तः श्रीकृष्णः शरणं मम।। 105।।
शेषः संकर्षणोऽनन्तः प्रद्युम्नोऽनन्तविक्रमः।
वासुदेवोऽनिरुद्धश्च श्रीकृष्णः शरणं मम।। 106।।
योगिहृत्पङ्कजावासो ध्यानयोगावलम्बनः।
भक्त्या त्वनन्यया लभ्यः श्रीकृष्णः शरणं मम।। 107।।
शब्दातिगो गिरातीतो भक्ताधीनोऽपराजितः।
चतुर्भावश्चतुर्मूर्तिः श्रीकृष्णः शरणं मम।। 108।।
विष्वक्सेनो महासेनो रक्षोवंशविनाशनः।
सर्वास्त्रशस्त्रसन्धर्ता श्रीकृष्णः शरणं मम।। 109।।
सुन्दरो जगदानन्दः कीर्तनीयः कृपानिधिः।
पूर्णचन्द्रसमः शान्तः श्रीकृष्णः शरणं मम।। 110।।
हरेर्नाम हरेर्धाम हरेर्लीला हरेः कथा।
प्रपन्नार्त्तिहरो मन्त्रः श्रीकृष्णः शरणं मम।। 111।।
जय जय श्रीकृष्णमन्त्रमहास्तोत्रे तृतीयो विरामः।।

''श्रीकृष्णः शरणं मम''

( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )

# भ्रातुः यज्ञोपवीतसंस्कारः

❑ डॉ. हर्षदेवमाधवः

वरतेजग्रामे अस्माकं कुटुम्बं न्यवसत्। माता प्राथमिकशालायां शिक्षिका आसीत्। 1958 तमे संवत्सरे पितुः देहावसानाद् एकवर्षं व्यतीतम्। ज्येष्ठभ्राता षोडशवर्षीय आसीत्। मध्यमभ्राता अष्टवर्षीयः, अहं चतुर्वर्षीयः। ज्येष्ठभ्राता यज्ञोपवीत-संस्कारविहीन आसीत्। मातुः संस्कारं कारयितुं धनव्ययार्थं शक्तिर्नासीत्। एकदा माता शालाया-मस्मिन् विषये चिन्तयन्ती नेत्राश्रूणि प्रामृजत् तदा अन्या कापि सहकर्मचारिणी शिक्षिका तामपश्यत्। सा मम मातुः दुःखकारणमजानात्।

अतः पश्चात् वरतेजग्रामस्य प्राथमिकशालायाः सर्वा शिक्षिकाः परस्परं सम्मन्त्र्य मम ज्येष्ठभ्रातुः यज्ञोपवीत-संस्कारदायित्वं निर्वोढुं निश्चयमकुर्वन्।

एकदा आचार्य मम मातरं कार्यालयम् आहूतवान्। सोऽवदत्, 'भगिनि ! मा चिन्तां करोतु। तव पुत्रकः अस्माकं भागिनेयोऽस्ति। भगिनीपतिर्दिवं गतः, किन्तु वयं मातुलाः, पितृष्वसारश्च अत्र स्मः।' मम माताऽवदत्, 'किन्तु महोदय! धनम्...।' आचार्यः प्रत्युदतरत्, 'भवत्या न किञ्चिदपि देयम्। अस्माकं शालायां सदाशङ्करः कर्मकाण्डविशारदो वर्तते। स एव सर्वविधिं कारयिष्यति।' 'किन्तु सर्वेषां कृते भोजनव्यवस्था...' आचार्यमहोदयः सप्रश्रयम-वदत्, 'भगिनि! वयं तत्कृतेऽपि व्यवस्थां करिष्यामः। रविवासरे शुभमुहूर्ते शालाप्राङ्गण एव यज्ञोपवीत-संस्कारो भविष्यति पुत्रकस्य' मम माता हर्षाश्रूणि प्रमृज्य गृहमागत्य सर्ववृत्तान्तं न्यवेदयत्।

अथोत्तरं श्रावणमासस्य एकस्मिन् शुभरविवासरे शालायां मण्डपं विरच्य सदाशङ्करमातुलः मम ज्येष्ठभ्रातुर्यज्ञोपवीतसंस्कारविधिमकरोत्। शालायाः शिक्षकाः धनसञ्चयं कृत्वा समोदकां भोजन-व्यवस्थामकुर्वन्। सर्वे सम्बन्धिनः शिक्षका एव आसन्। ते सर्वे सम्बन्धिनां क्षतिपूर्तिं कृत्वा सहर्षं दायित्वं स्व्यकुर्वन्।

यदा संसारे मनुष्यः अनाथो, दरिद्रः निराधारो भवति तदा ईश्वर एव येन केन रूपेण तस्य कार्यसिद्धिं करोति। स एव कमपि मनुष्यं माध्यमं कृत्वा साहाय्यं करोति। वरतेजप्राथमिकशालायाः शिक्षका नैकेषु प्रसङ्गेषु अस्माकं कुटुम्बस्य सम्बन्धिनोऽभवन् तत्सर्वमहं न जाने। तेषां धर्मा विभिन्नाः, ज्ञातयश्च भिन्ना आसन्, केवलं 'मानवता' तेषां साधारणधर्म आसीत्।

**8, राजतिलक बंग्लोज, आबादनगरम्,**
**बसस्टोप के पास, बोपल, अहमदाबाद-380058**

---

**प्रेरकप्रसङ्गशतकम्**

# उपहारः

**पंचषष्टितमः प्रसङ्गः**

❑ **श्रीमती आराधना धर्माधिकारी**

कोषसंचयकार्यालये द्रव्यमानेतुं गत आसम्। चेक पत्रं मे पुटके आसीत्। मम स्वभावः चेकपत्रमहं गृहे एव पूरयामि केवलं हस्ताक्षराणि कार्यालये गत्वा तेषां सम्मुखे करोमि। अद्य कार्यालये नासीदधिको जनसम्मर्दः। मया चेकपत्रं निस्सार्य हस्ताक्षरार्थं लेखिनीं निस्सारयितुं वस्त्रपुटके हस्तं प्रदत्तं परं तस्मिन् लेखिनी नासीदेव। अहमग्रेस्थितं जनं लेखिनीं दातुमवदम्-परं तेनाप्य-समर्थता प्रकटिता। स चाग्रेस्थितामेकां युवतिं प्रति संकेतं कृतवान्। मह्यं संकोचः समभवत् परमुपाय एव नासीदपरः। मया अनुरोधः कृतः सा स्मितपूर्वकं पुरस्ता-ल्लेखिनीं निस्सार्य प्रदत्तवती। एकतः स्थित्वा मया हस्ताक्षराणि कृतानि। पृष्ठतः परावर्त्त्यावलोकितं तस्यै द्रव्यं सम्प्राप्तं सा बहिर्गच्छन्त्यासीत्। अहं प्रधाव्य तत्समीपे गत्वा सधन्यवादं लेखिनीं ग्रहीतुमवदम्-स्मितपूर्वकं सावदत् इट्स योर्स भवन्त एतां मे क्षुद्रोपहारं मत्वा स्वसमीपमेव स्थापयन्तु येनाग्रेऽपि याचना आवश्यकी न स्यात्। प्रायशो लेखिनीं नेतुं विस्मरन्ति। घटनयानया महानुपदेशः सम्प्राप्त आसीत्।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

❑ मिश्रोऽभिराजराजेन्द्रः

# केवलं सोऽस्ति मम हस्तोऽयम्

संसारे भद्रमभद्रं वा
जातं यत्किमप्यहोऽद्यावधि।
तद्येन कृतं नासीत्सोऽन्यः
केवलं सोऽस्ति मम हस्तोऽयम्।। 1।।

वनवीरे कक्षे समागते
राणोदयसिंहप्राणहरे।
येनाऽत्मज एव प्रदर्शितः
केवलं सोऽस्ति मम हस्तोऽयम्।। 2।।

सत्यञ्च शिवं सुन्दरं कृतं
प्रायशो येन भद्रं विहितम्।
तेनैव नृशंसमपीह वृतं
केवलं सोऽस्ति मम हस्तोऽयम्।। 3।।

पितृतुल्यविक्रमो महारथः
चक्रव्यूहं भित्वा विष्टः।
बालोऽभिमन्युरपि येन हतः
केवलं सोऽस्ति मम हस्तोऽयम्।। 4।।

वैदेही मिथिलाधिपस्य या
सुकुमारी कन्या यशस्विनी।
वल्कलैर्येन साऽप्यहोऽमता
केवलं सोऽस्ति मम हस्तोऽयम्।। 5।।

मीरा वैष्णवी भ्रातृजाया
गिरिधरगोपालरसोन्मत्ता।
गरलं निपाय्य हिंसितुमिष्टा
केवलं सोऽस्ति मम हस्तोऽयम्।। 6।।

नालन्दाविद्यागृहं हन्त
सन्दग्धं येनेस्लामधिया।
ननु बख्तियारखिलजीनाम्नः
केवलं सोऽस्ति मम हस्तोऽयम्।। 7।।

ध्वस्तानि गगनचुम्बीनि हन्त
स्थापत्यकलाकृतिमन्दिराणि।
धर्मं स्थापयन्नधर्मैः स्वैः
केवलं सोऽस्ति मम हस्तोऽयम्।। 8।।

अग्रजो बुभुक्षुर्दाराऽसौ
सम्पचन् हुमायूँमृतकगृहे।
भुवि सन्निपात्य कर्तितो गलैः
केवलं सोऽस्ति मम हस्तोऽयम्।। 9।।

निगृहीतः स्वयं शाहंशाहः
स हि शाहजहानो येन पिता।
भोजितश्च चणकैर्दुर्गगृहे
केवलं सोऽस्ति मम हस्तोऽयम्।। 10।।

लिखिता मिथ्या रणजयगाथा
शासनकर्तृणां, मृत्युभयात्।
दुष्कृतमपि येन कृतं सुकृतं
केवलं सोऽस्ति मम हस्तोऽयम्।। 11।।

ननु राज्यमवाप्तुं कातरेण
पुत्रेण पिता, भ्रात्रा भ्राता।
निर्दयं घातितो येन छलैः
केवलं सोऽस्ति मम हस्तोऽयम्।। 12।।

मे ददौ फलं यत् कुलालजा
तस्यै पशुपालस्तस्मायपि।
राज्ञी, राज्ञ्यै चार्पितं येन
केवलं सोऽस्ति मम हस्तोऽयम्।। 13।।

किं किं न बन्धुरं यशोहरं
मनसा चिन्तितं दृशा दृष्टम्।
तत्सर्वं किन्तु कृतं येन
केवलं सोऽस्ति मम हस्तोऽयम्।। 14।।

नरकस्वर्गोभयमेव हन्त
यदधीनं बन्धो ! यन्त्रय तम्।
सर्वदो, विचिन्तय धीरधिया
केवलं सोऽस्ति मम हस्तोऽयम्।। 15।।

पूर्वकुलपतिः
सनराइज-विला, लोअरसमरहिल, शिमला

# अत्रिस्मृतौ योगः शुद्धिः ब्रह्मप्राप्तिश्च

❑ डॉ. उषाकिरणयादवः
रामावतारशर्मा

**भूमिका**

**''श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः।**
**इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्।।''**

मनुस्मृतेः एतत्कथनानुसारं मनुष्याणां यशस उत्तमसुखप्राप्तेश्च मुख्याधारो श्रुतिस्मृतिकथितं धर्माचरण-मस्ति। धर्माणाङ्कथनं स्मृतिषु मनुष्याणां गुणस्वभाव-स्यानुरूपमतिस्पष्टतया सुगमतया च कृतं येनैते सुग्राह्याः समाचरणीयाश्च सन्ति। 'धर्मः' अत्र प्रायेण वैदिक-वाङ्मयस्य सकामनिष्कामोभयविधयोगस्यापरपर्यायो विद्यते। समग्रकर्त्तव्यरूपे धर्मेऽस्मिन् लौकिकाभ्युदयस्य श्रेयसश्च सर्वविधकर्त्तव्याणि सन्निहितानि सन्ति। मौलिकज्ज्ञानं यमनियमाः कर्त्तव्यानामपरिहार्यांगानि सन्ति शुद्धिस्तेषु प्रमुखा विद्यते। शुद्धेरनेकोपायाः कथिताः येषु योगयज्ञौ प्रमुखौ स्तः। रजोगुणप्रधानतया तमोगुणस्य प्रधाने च संजाते सदाचारिणोऽपि पापकर्माणि जायन्ते तेषां शुद्ध्यर्थं प्रायश्चित्तविधानमपि कृतं धर्मशास्त्रस्वरूपासु स्मृतिषु सर्वास्वेव प्रायः प्रायश्चित्त-करणस्य विविधा उपायाः प्रतिपादिताः योगस्तेषु प्रमुखो विद्यते। शोधलेखेऽस्मिन् योगस्य विवेचनं क्रियते। विवेचनमिदम्मुख्यतः अत्रिस्मृत्याधारितं विद्यते। स्मृतिरियं 'सप्तर्षि-स्मृति-समुच्चयः' इति ग्रन्थे संकलिता विद्यते। अस्मिन् ग्रन्थे वशिष्ठ-काश्यप-गौतम-भरद्वाज-विश्वामित्र-पुलस्त्याख्यानां षण्णां ऋषीणां स्मृतय अपि संचिताः सन्ति। ग्रन्थस्यास्य सम्पादकेन प्रो. डॉ. प्रभाकरशास्त्रिणा योगस्य वर्णनमत्र पातकशुद्धिप्रसंगे प्रारभ्यते समग्रलक्ष्यप्रप्तौ च समाप्यते। वर्णनमिदमधो-लिखितरूपेणास्ति।

**प्रतिपाद्यः** शंसितव्रतानां ऋषीणां प्रार्थनया महर्षिः अत्रिः नैकानुपायानकथयत् शुद्धेः। शुद्धि-मिच्छन्तः पातकान्विताः पातकेभ्यो प्रमुच्यन्ते उपायैर्यैस्ते पवित्रप्राणायामदानहोमजपाः सन्ति। प्रमुखश्चैतेषु योगो विद्यते योगाङ्गेषु च प्राणायामध्यानौ प्रमुखौ विद्येते। **योग** अत्र ज्ञानप्राप्तेरुपायो धर्मस्य स्वरूपं नित्यं परं तपो विद्यतेऽतः सदा समाश्रयणीयोऽस्ति। द्विजैर्या गतिस्तीव्रेण तपसा ध्यानैर्यज्ञेन प्राप्तुमशक्या भवति सा योगात् प्राप्तुं शक्यते।

**''अपि ख्यापितदोषाणां पापानां महतां तथा।**
**सर्वेषां चोपपापानां शुद्धिं वक्ष्यामि तत्त्वतः।।**
**प्राणायामैः पवित्रैश्च दानैर्होमैर्जपैस्तथा।**
**शुद्धिकामाः प्रमुच्यन्ते पातकेभ्यो न संशयः।''**
**योगातमसम्प्राप्यते ज्ञानं योगो धर्मस्य लक्षणम्।**
**योगः परं तपो नित्यं तस्माद्युक्तः सदा भवेत्।**
**न तां तीव्रेण तपसा न ध्यानैर्न च वेज्यया।**
**गतिं गन्तुं द्विजाः शक्ताः योगात् संप्राप्नुवन्ति याम्।**
**सप्तर्षि-स्मृति-समुच्चये, अत्रिस्मृतौ।।** 4-5, 12, 9

महर्षिणा योगस्य प्राणायाम धारणाप्रत्याहार-नामकैरङ्गैः शुद्धिकरणन्ध्यानेन चेश्वरस्य गुणानामाधानस्य निरूपणङ्कृतमित्थम्-

**''प्राणायामैर्दहेत् दोषान् धारणाभिश्च किल्विषम्।**
**प्रत्याहारेण विषयान्ध्यानेन चैश्वरान् गुणान्।।'' तत्रैव** 1110

अत्र प्राणायामस्य सविस्तरं वर्णनङ्कृतं यस्मिन् प्राणायामस्य विधिः शुद्धप्रक्रियालक्षणम्महत्त्वं कालस्य कथनञ्च समाविष्टं विद्यते।

**प्राणायामस्य विधिः**- ब्रह्मज्ञानिभिः हस्त-शुद्ध्या सह समुपविश्य सप्रणवं व्याहृतिभिः नित्यं प्राणायामाः कर्त्तव्याः। एवं विधिना कृतः प्राणायामः नखशिख-पर्यन्तमुत्तमं तपो भवति। तत्रैव, 1/6-7

**प्राणायामे शुद्धेः प्रक्रिया** - प्राणनिरोधाद् वायुः जायते अग्निर्जायते जलं जायते, त्रिभिएभिः आन्तरिकी शुद्धिर्भवति। ''**निरोधाज्जायते वायुर्वायोरग्निर्हि जायते। तापेनापो हि जायन्ते ततोऽन्तः शुध्यते त्रिभिः।।तत्रैषु 1/8**''

**प्राणायामस्य लक्षणम्** - ''**सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह। त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते।।**'' स्मृतेः प्रथमाध्यायस्य षोडशतमं पद्यं विद्यत इदमस्यार्थः स्पष्ट एवास्ति। लक्षणेन स्पष्टीभवति यत् प्राणायामे त्रिवारं व्याहृत्या सह प्रणवस्य गायत्र्याश्च पाठः आवश्यकः अस्ति। कारणं किमस्तीति स्मृतेः। 1/13-15 पद्येषु स्पष्टीकृतम्-

**''प्रणवाद्यास्त्रयो वेदाः प्रणवे पर्यवस्थिताः।**
**वाङ्मयं प्रणवं सर्वं तस्मात्प्रणवमभ्यसेत्।।**
**प्रणवे नित्ययुक्तस्य सव्याहृतिषु सप्तसु।**
**त्रिपदायां च गायत्र्यां न भयं विद्यते क्वचित्।।**
**एकाक्षरं परं ब्रह्म प्राणायामः परं तपः।**
**ब्रह्माणी चैव गायत्री पावनं परमं स्मृतम्।।''**

**प्राणायामस्य महत्त्वं कालश्च** :- महर्षिणा सकालं प्राणामस्य महत्त्वमित्थं प्रतिपादितम् -

**''तथा चर्म तथानङ्गा दोषा अभ्यर्ति धर्मतः।**
**तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात्।।**
**प्राणायामांश्चरेत्त्रींस्तु यथाकालमतन्द्रितः।**
**अहोरात्रकृतात्पापात्तत्क्षणादेव शुध्यति।।**
**कर्म्मणा मनसा वाचा यदेनः कुरुते निशि।**
**संतिष्ठन् पूर्वसन्ध्यायां प्राणायामैस्तु पूयते।।**
**कर्मणा मनसा वाचा यदह्ना कुरुते त्वघम्।**
**आसीनः पश्चिमां सन्ध्यां प्राणायामैस्तु शुध्यति।।''**

तत्रैव 1/9, 2/1-3

स्मृतौ कतिपयविशिष्टपापानां परिगणनां कृत्वा तेषां शुद्धये प्राणायामस्य विशिष्टं स्वरूपमपि प्रतिपादितमधोलिखितरूपे - ब्रह्महा गुरूतल्पी वाऽगम्यगामी सुवर्णस्तेयः सुरापी गोध्नो विश्वासधाती मित्रध्रुक् शरणागतघाती कूटसाक्ष्यकार्यकृच्चैवमादिष्वन्येष्वपि नरः प्राणायामशतं कृत्वा सूर्योदयं प्रतिदिनमापः प्रवहतामिति त्रिरावर्त्य मुच्यते सर्वकिल्विषैः।

**सूर्यस्योदयनं प्राप्य निर्मला धौतकल्मषाः।**
**भवन्ति भास्कराभास्ते विधूमा इव पावकाः।।**
**तत्रैव 8/11-12**

अस्मिन्नेव प्रसंगे ध्यानस्यापि महिमा कथितः सर्वातिशायी योऽधोलिखितैः पद्यैः सुस्पष्टो जायते- पातकशुद्धौ ध्यानस्य महत्त्वं लक्षणञ्च।

**''ध्यानेन सदृशं नास्ति शोधनं पापकर्मणाम्।**
**श्वपाकेष्वपि भुञ्जानो ध्यानेनेह विशुध्यति।।**
**ध्यानमेव परं ब्रह्म ध्यानमेव परं तपः।**
**ध्यानमेव परं शौचं ध्यानमेव परं पदम्।।**
**सर्वपापप्रसक्तोऽपि ध्यायन्नेव प्रमुच्यते।**
**तपस्वी च भवेदेवं पंक्तिपावनपावकः।।''**
**तत्रैव 8/13-15**

ध्यानस्य लक्षणं किमस्तीति जिज्ञासा सहजैवास्ति। जिज्ञासायाः शमनमनेन ध्यानलक्षणेन भवति-

**''उपलब्धिः स्मृतिर्ध्यानं संकल्पः प्रणवं प्रति। कल्पना भावना चिन्ता ध्यानमित्यभिधीयते।।''तत्रैव 9/5**

**योगस्य सर्वाङ्गानि** - योगस्यावयवाः समग्रतः कति भवन्त्यस्य प्रश्नस्योत्तरमधोलिखितेन पद्येन प्राप्यते नामान्यपि ज्ञायन्ते च-

**''प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा। तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते।।'' तत्रैव 9/6**

पद्येन स्पष्टीभवति यन्महर्षेः योगावधारणा षडवयवा विद्यते-

**षडङ्गयोगस्याधिकारी**- षडङ्गस्य योगस्य अधिकारी को भवतीदं ज्ञानं स्मृतेः नवमाध्यायस्य अनेन पद्येन भवति -

**यो ध्याता यच्च ध्यानं यद् ध्येयं यत् प्रयोजनम्।**
**सर्वाण्येतानि यो वेत्ति स योगं योक्तुमर्हति।।**

अधिकारिणा ज्ञातव्यतत्त्वानामेषां ज्ञानमिदं पद्यं ददाति- **''आत्मा ध्याता मनोध्यानं ध्येयः सूक्ष्मो महेश्वरः। यत् परात्परमैश्वर्यमेतत् ध्यान-प्रयोजनम् '' तत्रैव 9/2**

**योगस्य समग्रफलम्**- ऋषेर्मतमस्ति यत्प्रधानगुणतत्त्वज्ञः सर्वसूक्ष्मतत्त्वानि षडङ्गञ्च महेश्वरं ज्ञात्वा परं ब्रह्माधिगच्छति।

**''विदित्वा सर्वसूक्ष्माणि षडङ्गं च महेश्वरम्। प्रधानगुणतत्त्वज्ञः परं ब्रह्माधिगच्छति।।'' तत्रैव 9/3**

**निष्कर्षोऽयमस्ति** यत्पातकशुद्धौ ब्रह्मप्राप्तौ च योगस्य भूमिकाऽद्वितीया विद्यते। योगोऽयं पापानां पूर्वसुरक्षाऽस्ति कृतपापानामपूर्वोपायो परात्परमैश्वर्यस्य कल्याणस्य चापरपर्यायो विद्यतेऽत अस्माभिस्सदा योगस्य विभिन्नरूपेषु विविधाङ्गेषु च सम्पृक्तैर्भवितव्यम्। शुद्धेरन्ये विविधा उपाया अपि अत्रिस्मृतौ कथितास्तेषां ज्ञानानुष्ठानार्थमपि स्मृतिरियमत्युपयोगिनी विद्यते तदर्थमपि स्मृतिरेषा पठनीया पाठनीयाश्चाधिकारिभ्यः। महर्षेर्मते स्मृतेर्महिमाऽयमस्ति-

**''यस्त्विदं पठते शास्त्रं विप्रेभ्यश्च प्रयच्छति। मुच्यते सर्वपापेभ्यो ब्रह्मलोकं स गच्छति।।'' तत्रैव 9/7**

पद्येनैतेनैव स्मृतिः समाप्ता संजायते।

**सन्दर्भाः** -


1. सप्तर्षि-स्मृति-समुच्चयः। सम्पादनम्- प्रो. (डॉ.) प्रभाकर शास्त्री। रचनाप्रकाशनम्, जयपुरम्-3020001 संस्करणम्-2005

2. मनुस्मृतिः व्याख्याकारः सुरेन्द्रनाथसक्सेना। मनोज पब्लिकेशन्स, दिल्ली, 2003



**सह आचार्य, संस्कृतविभागे**

सेमुमा राजकीये स्नातकोत्तरकन्यामहाविद्यालये

भीलवाड़ानगरम् (राज.) चलसंकेताङ्कः 9414812105

शोधच्छात्रः



❑ **डॉ. हर्षदेवमाधवः**


# स्वच्छविः ( Selfie )

अहं गृह्णामि स्वच्छविं यतोऽहं
पश्येयं पृष्ठतो मे विश्वचेतनाम्,
मयि द्रष्टुं शक्नुयाम्
ब्रह्माण्डचैतन्यम्,
अनुभवेयं मे हास्ये
मम सर्जकस्य प्रसन्नताम्,
विस्मरेयं मम शान्त्यां
सन्त्रासकोलाहलम्,
निमज्जेन्मे श्रद्धायां
द्वैतभावम्,
स्पृशेयं मम नेत्रयोः
प्रातःकालोन्मीलितपुष्पस्वप्नम्,
दृश्येत नभसश्शान्तरूपं पृष्ठभूमौ।
अर्धोद्घाटितयोरोष्ठयोः
शृणुयाम् काव्यशब्दम्,
क्षिपेयं चिन्तास्यूतम्
बाल्यकाले यथा
ह्यक्षिपम् शालास्यूतम्।
जानाम्यहं यत्
सहस्रशतरूपेषु
यद्विलसति तद्हन्ता मे केवलम्,
अत एव स्वच्छविं दृष्ट्वा
पुनरपि प्राप्नोम्यहं
मामेव, यस्मिन् वर्तन्ते सर्वे...
त्वद्भावाः,
त्वमपि पश्य मे छविम्,
कदाचित् पश्येस्त्वां मय्येव।।


**8, राजतिलक बंग्लोज, आबादनगरम्, बसस्टोप के पास, बोपल, अहमदाबाद-380058**

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# तन्त्रालोकविवेचको ग्रन्थः

काश्मीरकविद्वत्तल्लजः श्रीमानभिनवगुप्तः सुप्रथितो विद्वत्सु। दशमशताब्द्यां शारदादेशे सारस्वतसाधनां कुर्वताऽनेन काश्मीरशैवदर्शनं विवेचयताऽप्यनेके ग्रन्था व्यरचिषत, काव्यशास्त्रीया ग्रन्था अपि। विद्वद्वरस्यास्य सहस्राब्दी सपद्येव सम्मानिता संस्कृतसुधीभिः। अभिनवभारती-ध्वन्यालोकलोचनादयः काव्यशास्त्रीया ग्रन्था अस्य सुप्रथिताः, पाठ्यक्रमेषु सम्मिलितत्वात् सुविदिता अपि किन्तु सर्वाधिकं शास्त्रीयलेखनमस्य शैवागमसम्बद्धमस्ति। शैवतन्त्रस्य विवेचका अस्य ग्रन्थाः ''तन्त्रालोक'' ''तन्त्रसार'' तन्त्रवटधानिका मालिनीविजयवार्तिकप्रभृतयः बोधपञ्च-दशिका, परमार्थसार-परमार्थचर्चा-परमार्थ-द्वादशिका-क्रमस्त्रोत्र, भैरवस्तोत्र-अनुत्तराष्टिका-अनुभवनिवेदन-देहस्थदेवताचक्र-प्रभृतीनि स्तोत्राणि पद्यरचनाश्चापि मूर्धन्यं स्थानं बिभ्रति शैवागमस्येतिहासे। शैवदर्शनस्य मूर्धन्येन विदुषा डॉ. कान्तिचन्द्रपाण्डेयेन तद्विषये ग्रन्था अपि व्यलेखिषत।

जयपुरीया विद्वद्वर्याः स्व. डॉ. रामचन्द्रद्विवेदिनः तत्पत्नी डॉ.कमला द्विवेदी चाऽपि अभिनवगुप्तकृतीनां विमर्शका व्याख्यातारश्चाऽभूवन्। डॉ. कमला द्विवेदिवर्यया तद्विषयकं शोधं विधाय शोधोपाधिरपि लब्धोऽभूत् (डॉ. कान्तिचन्द्र पाण्डेय प्रेरणया, डॉ. विष्णु-रामनागर निर्देशने, 1976 ई.)। तन्त्रालोकः खलु शैवतन्त्रस्य विश्वकोष इवाऽस्ति यत्र शैवागमस्य दार्शनिकाः सिद्धान्ता अपि विवेचिताः सन्ति, शक्ति-तन्त्रोपासनाविधयोऽपि निर्दिष्टाः सन्ति। 37 आह्निकेषु विभक्तोऽयं ग्रन्थः कारिकासु दार्शनिकानागमिकांश्च सिद्धान्तान् वर्णयति। आधारग्रन्थोऽयं सर्वैः शैवागम-विद्वद्भिरधीयते। प्रो. रामचन्द्र द्विवेदी, डॉ. नवजीवन रस्तोगी प्रभृतिभिरप्यनुशीलितोऽयम्। डॉ. कमला द्विवेदिवर्यया लिखितः शोधग्रन्थः ''तन्त्रालोक सानुवाद विवेचन'' प्रकाशमाप्त इति हर्षास्पदं वृत्तम्। डॉ. बीना अग्रवाल वर्ययाऽपि तन्त्रालोके निर्दिष्टस्य कर्मकाण्डस्य विवेचनमेकस्मिन् ग्रन्थे कृतमस्ति।

एवंविधा ग्रन्था वाराणसेयेन विदुषा, सम्प्रत्युज्ज-यिनीवास्तव्येन डॉ. सूर्यप्रकाश व्यासेन सम्पाद्य प्रकाशिता इति सूचतिचरमेव भारत्याम्। तन्त्रालोकस्य 4-6 आह्निकानां मूलपाठेन सह हिन्द्यनुवादं तेषां हिन्द्यां विमर्शात्मकं विवरणं च प्रस्तुवन् डॉ. कमलाद्विवेदि-वर्याया ग्रन्थः ''तन्त्रालोकः सानुवाद विवेचन'' शीर्षकवहः सम्प्रति प्रकाशितोऽनेन विदुषा। अत्र काश्मीरकशैवदर्शनस्य संक्षिप्ता रूपरेखा पूर्वं प्रस्तुताऽस्ति, तदनु तन्त्रालोकस्य परिचयः प्रस्तुतोऽस्ति, 37 आह्निकेषु किं विषयवस्तु वर्तते इति विवेच्य शक्तिपातादिशाक्तोपायानां वर्णनं द्वितीयपरिच्छेदे, काल-दशादिसम्बद्धानामाणवोपायानां वर्णनं तृतीये परिच्छेदे समाविष्टमस्ति। तदनु 4, 5, 6, आह्निकानां मूलपाठः, तदनु पद्यानां हिन्द्यनुवादः, तदनु सन्दर्भादिविवेचयन्त्य-ष्टिपण्यः प्रस्तुताः सन्ति।

एवंविधेषु ग्रन्थेषु शैवागमस्य, बौद्धदर्शनस्य, अन्येषां च विरलतया प्रबोध्यमानानां विषयाणां परिचयः पाठकैः प्राप्तुं शक्य इत्यतः स्वागतमेषां प्रकाशनानां विधास्यते इति

स्पष्टमेव। सोऽयं ग्रन्थः आचार्य रामचन्द्रद्विवेदिग्रन्थ-मालायाः 21 तम पुष्परूपेण प्रकाशितोऽस्ति।

**तन्त्रालोक, आह्निक 4-6 सानुवाद विवेचन, ले. डॉ. कमला द्विवेदी सम्पा. डॉ. सूर्यप्रकाश व्यास, प्रका. आर्यभाषासंस्थान, वाराणसी, प्राप्तिस्थानम् डॉ. सूर्यप्रकाश व्यास 9, अथर्वविहार, इन्दौर रोड, उज्जैन 10, पृ.सं. 340 मू. 5001.**

## कालिदासाधारिता नाट्यकृतयः

विश्वप्रसिद्धस्य कालजयिनः कविकुलगुरोः कालिदासस्य 7 कृतयो भारतस्यामूल्यः सारस्वतो निधिः। तस्याध्ययनाध्यापनादि समस्तेऽपि विश्वे क्रियते। तस्य काव्यनाटकादीनां शतशोऽनुवादाः विश्वभाषासु प्रकाशिताः, शाकुन्तल-रघुवंशादिनाटक-काव्या-दीनामाधारेण कथा अपि विलिखिताः साहित्यकारैः, तस्य कृतीनां दूरदर्शन-रेडियो-फिल्म-नाट्यरूपान्त-राण्यपि प्रास्तूयन्त, प्रासार्यन्त च। तस्य कृतीनां बहवोंऽशाः शिक्षणालयेषु छात्रैर्मञ्चोपर्यवतार्यन्तेऽपि।

कालिदासस्य प्रमुखकृतीनां कतिपयानां कथानामा-धारेण, कतिपयचरित्राणां च परिचयं कारयितुं कथोप-कथनशैल्यां मञ्चोपयुक्तविधया च संक्षिप्तानां मञ्चीयनाट्यानां निबन्धनं क्रियते चेच्छात्राणामपि सुखावबोधः स्यात्, कालिदासकृतीनां परिचयोऽपि च स्यादिति विचिन्त्य राजस्थानीयेन नाटककारेण कविना गद्यकारेण च पं. साँवरमल शास्त्रिणा कालिदासकृतिभ्यः 17 कथा आदाय 17 मञ्चोपयुक्तानि नाटकानि सरल-संस्कृते प्रणीतानि सपद्येव प्रकाशमायातानि। एता नाट्यकृतयः प्रमुखतो दृश्यद्वये, दृश्यत्रये वा निबद्धाः सन्ति। कथोपकथनमध्ये कालिदासीयपद्यान्यप्युद्धृतानि छात्राणां कृते उपकारकाणि स्युः। रघुवंशात् सीता-परित्यागकथा, शाकुन्तलात् शकुन्तलायाः कण्वाश्रमाद् विश्लेषोपलक्ष्ये आश्रमावसादवातावरणम्, तस्मादेव मारीचाश्रमे शकुन्तलादुष्यन्तयोः पुनर्मिलनं साहचर्यं च, विक्रमोर्वशीयात् पुरूरवसो विरहदृश्यानि (4) इत्येवं प्रमुखकथाभागा नाट्यरूपेण प्रस्तुताः सन्ति नाट्यलेखकेन।

छात्राः समये समये स्वकीयेषु शिक्षणालयेषु नाट्यप्रस्तुतिरूपेण कृतीनामासामवतारणं कुर्युश्चेति प्रयासेनैकेन तेषामपि शिक्षा स्याद् दर्शकानामपि मनोरञ्जनं, कालिदासकृतिकथापरिचयश्च स्यादिति पं. साँवरमल शास्त्रिण आकूतं प्रतीयते।

''कालिदाससौरभम्'' इति ग्रन्थास्यास्य नामधेय-मस्ति। ग्रन्थे संगृहीतानां नाट्यकृतीनां नामानि कथाऽऽधारितानि यथा ''पार्वतीशङ्करयोः परिणयः'' (कुमार-सम्भवात्), प्रणयः (विक्रमोर्वशीये उर्वशी-पुरुरवसोः प्रेम) सीतापरित्यागः (रघुवंशीया घटना) इत्यादि। नाट्यकारः सर्वाणीमानि 17 नाट्यरूपान्तराणि ''एकाङ्कि'' नाटकानीत्यभिधत्ते, एकाङ्किष्वेषु नाटकेषु 2, 3, 4 दृश्यानि सन्त्यन्तर्भूतानि।

कविकुलगुरोः कालिदासस्य कृतीनां सौरभप्रसारण-स्य नूतनोऽयं प्रयोगः शिक्षकाणां, शिक्षार्थिनां नाट्यनिर्देशकानाम्, अभिनयेच्छुकानां छात्राणां चोपकारकः स्यात्, सामान्यपाठकानामपि मनोरञ्जकः स्यादित्यस्य स्वागतमाशास्यते संस्कृतजगति, वर्धाप्यते च प्रकाशनस्यास्योपलक्ष्ये लेखकवर्यः।

**कालिदासौरभम्ः ले. पं. साँवरमलशास्त्री प्रका. सौरभ पब्लिकेशन, झालानियों का रास्ता, किशनपोल बाजार, जयपुर, पृ.सं. 150, मू. 225/-.**

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-

षट्त्रिंशत्तमः प्रसङ्गः

# संघपरम्पराणामुद्गमः

❑ वेणीमाधव गो. धर्माधिकारी

तत्कालीनाः सरकार्यवाहकाः श्रीमन्तो मधुकर दत्तात्रेयदेवरसमहोदयाः वर्णयन्ति यन्मया स्मर्यते ईशवीये 1927 वर्षान्ते 1928 वर्षस्य प्रारम्भे संघकार्यालयोऽयं दशोत्तरविपण्यामासीत्। तस्मिन् समयेऽहं सप्तमकक्षायाः छात्र आसम्। कार्यालये मुख्यरूपेण बाबामहोदयाः बर्वे गुरवश्च निवसन्तावास्ताम्। बर्वे गुरवः संघकार्यस्यावलोकनं कुर्वन्तिस्म आप्टे महोदयाश्च स्वयंसेवकैः सह संघकार्यचर्चां कुर्वन्तिस्म। कार्यालये ते स्वभोजनं स्वयमेव पचन्ति स्म। संघकार्यसम्बद्धः सर्वेऽपि व्ययं ते स्वयमेव वहन्तिस्म। वयं यदि कार्यालये भोजनसमये सम्प्राप्तास्तदा साग्रहं ते कथयन्तिस्म चलन्तु पोषाहारं गृह्णामः। तेषां भोजनप्रकारोऽपि विशिष्ट एवासीत्। पाचितं सर्वमपि भोजनं मिश्रितं क्रियतेस्म तदुपरि शर्करानिक्षेपं कुर्वन्तिस्म। अयमेव तेषां पोषाहारः।

बाबामहोदयैः वार्त्ताप्रसङ्गेषु न कदापि स्वव्यक्तिगतजीवनस्योल्लेखः कृतः। ते लघुना बालस्वयंसेवकेन तरुणेन च सर्वैरेव आत्मीयतापूर्वकं परिचयं कुर्वन्तिस्म। सर्वांश्च संघकार्यार्थं प्रेरयन्तिस्म। येषां समीपे गन्तुं कस्मै अपि कीदृशोऽपि संकोचः न भवति स्म।

संघकार्ये तत्परतायाः परिश्रमस्य च याः परम्पराः निर्मितास्तासामुद्गमस्य श्रेयः सर्वथा तेभ्य एव। संघकार्यविस्तारार्थं यथा यथा अधिकसमयस्य शक्तेश्चावश्यकता संजाता, आप्टेमहोदयास्तदर्थमुद्यताः। अत एव तैः सेवाकार्यं परित्यक्तम्। सम्पूर्णेऽपि समये ते संघकार्यसंलग्ना अभवन्। संघकार्यविस्ताराय स्थाने स्थाने प्रवासमकुर्वन्। वर्तमानसमयवत्तेषु दिवसेषु प्रवासो न सुकरः। वर्तमानसमये तु संघकार्यकर्तुः प्रवासस्योत्तमा व्यवस्था सरलतयैव जायते। परं तेषु दिवसेषु प्रवासः परिश्रमपूर्णं कार्यमासीत्। श्रीबाबा महोदयाः द्वादशमाइलात्मकं प्रवासं पद्भ्यामेवाऽकुर्वन्। ते द्विचक्रिका-चालनं तु नैव जानन्तिस्म। पद्भ्यामेव बहुवारं स्थानात्स्थानं गच्छन्तिस्म। तेषु दिवसेषु तु प्रवासे सामान्येन द्विवारं भोजनमपि दुष्करं भवतिस्म। बाबामहोदयैः प्रवासे जायमानक्लेशानां चिन्ता नैव कृता, सहैव तैः स्वयंसेवकैः सह परस्परं वार्त्ताप्रसंगे तेषामुल्लेखोऽपि न कृतः। स्वयमेव क्लेशवहनेन परिश्रमेण च सह तेषु वैशिष्ट्यं यत्ते स्वाभिमानिनः आसन्।

एकदा ते विदर्भे एकस्मिन् स्थाने गताः अपरस्मिन् दिने तैरपरस्थाने गन्तव्यमासीत्। येषां गृहे तैः विश्रामः कृत आसीत् तेऽपि सुसंपन्नाः धनिन आसन्। यस्मिन् ग्रामे गन्तव्यमासीत्तस्मिन्नेव कार्पासपूरितं शकटं गच्छदासीत्। तेन तस्मिन्नेव तेषां प्रेषणस्य व्यवस्था कृता। पृथग् रथस्य व्यवस्था नैव कृता। एषा चर्चा यदा तैः श्रुता तदा तेऽवदन्अयं भारः कार्पासशकटे नैव गमिष्यति एवं कथयित्वा ते पद्भ्यामेव ततश्चलिताः। स्वाभिमानपूर्वकं संघकार्यं वर्द्धयितुं परिश्रमपूर्वकं यदपि कष्टमाग्च्छेत्तद-विसह्य साग्रहं कार्यं पूर्णं कर्त्तुं या तेषां परम्परासीत् सा दर्शनीयैव। स्वयंसेवकेषु सैव प्रेरणास्पदा अभवत्। तस्याः श्रेयः बाबामहोदयेभ्य एव।

ते तादृशाः दिवसाः आसन् यदा संघस्य विचारधारया कार्यपद्धत्या च जनाः अपरिचिता आसन्। बहुविधाः वैचारिकाः मतभेदाः आयान्तिस्म। समाजः संघकार्यस्योपेक्षां करोतिस्म। एतादृशे समये कस्या अपि शाखायाः कार्यकर्त्ता निराशः संजायतेस्म तदा बाबामहोदयाः स्वयं तत्र गच्छन्तिस्म कतिपयदिनानि तत्र स्थित्त्वा तस्योत्साह-वर्द्धनं कृत्वा कार्ये योजयन्तिस्म। यथा शिशुं प्रचलनं शिक्षयितुमुपदेशानां प्रस्तावानां नास्त्यावश्यकता अंगुलिं धृत्वा सहप्रचलनस्यैवावश्यकता तथैव बाबामहोदयै एकैकं कार्यकर्त्तुः सहायता कृता।

**ब्रह्मपुरी, जयपुरम्**

# आधुनिकग्रन्थावलिप्रकाशनोपक्रमाः

❑ महामहोपाध्याय देवर्षिकलानाथशास्त्री
प्रधान सम्पादकः

अस्माकमुपास्या सेयं गीर्वाणगिरा यावती पुरातनी भाषाऽस्ति तावती नवीनाऽप्यस्ति। सहस्त्राब्दीनामनेकासां कालो व्यतियातो यदवधि साहित्यसर्जनमस्यां विधीयमानमस्तीति यावान् पुरातनोऽस्या इतिहासो विख्यायते, तावत्येव नूतनताऽप्यस्यामस्ति, चिरयौवनवती सेयं भाषेति विद्म एव वयम्। अत एव वेदकालीनाया ऋषिकाया लोपामुद्राया उषः सूक्तानुसारं यथा सेयमुषाः ''पुराणी युवति'' रित्याख्यायते स्म (पुराणी देवि युवतिः पुरन्धिः), तथैव संस्कृतभाषाऽपि पुराणी युवति रस्तीति सर्वदा सहर्षमुल्लिखामो वयम्। अत एव प्रतियुगं नूतनं साहित्यमस्यां सृज्यमानमवलोकयितुं शक्यते। भासकालिदासादीनारभ्य वर्तमानयुगीनकविकथाकारादिपर्यन्तं काव्य-नाटक-कथोपन्यासादि-साहित्यं यदद्यत्वे सर्जनात्मक-साहित्याऽभिधानेनोल्लिख्यते, निरन्तरमस्यामवतार्यमाणमस्त्येव। एतस्य परिधौ, विधिविशेषेषु च विस्तार एव संजायते, न नैयून्यम्।

एकोनविंश्याः शताब्द्या अवसानस्य, विंश्याः शताब्द्याः प्रारम्भस्य च कश्चन कालखण्डो निर्विवादं पुनर्जागरणयुगत्वेन भारतीयसाहित्येतिहासेऽपि समभिधीयते, भारतीयसमाजेऽपि। मुद्रणालयानां प्रसारेण, पुस्तकानां, पत्रपत्रिकाणां च विस्तारेण संस्कृतभाषाया इतिहासेऽपि नव-जागरण युगमिदमासीदिति सर्वे वयं मन्यामहे। तदैव भारते विश्वविद्यालयशिक्षा प्रसारमाप, तत्र च संस्कृतभाषाया महत्त्वं सविशेषमाख्यापितमाङ्गलशासकैरपि, संस्कृतसाहित्यस्याभिज्ञानशाकुन्तलप्रभृति नवनीतं पाश्चात्यभाषास्वनूद्य यदवधि प्रासारि विलियमजोन्सप्रभृतिभिराङ्गलैः, शार्मण्य देशीयैश्चाऽपि, तदवधि संस्कृतं विश्वजनीनत्वेन महत्त्वमधादित्यपि मन्यामहे वयम्। तदानीं खलु विश्वविद्यालयेषु संस्कृतस्याध्ययनाध्यापनादि सविशेषं प्रासरत्। तादृशस्याध्यापनस्य, परीक्षाणां च माध्यमं त्वभूदाङ्गलभाषैव। तदानीं खलु भारतीये संस्कृताध्येतृसमाजे धाराद्वयं प्राचलत्।

एका धाराऽभूत्तदृशानां विश्वविद्यालयादिवरिष्ठशिक्षासंस्थानेषु समधितस्थुषां विदुषां येष्वाङ्गला वैदेशिकाश्चाऽप्यभूवन्, भारतीया अपि; ये संस्कृतभाषां तत्साहित्यं च क्लासिकल (श्रेण्य) वाङ्मयत्वेन गभीरस्य शोधस्यानुसन्धानस्य च विषयं मन्यन्ते स्म, वेदोपनिषत्पुराणादीनां, श्रेण्य-साहित्यस्य चानुशीलनं, तदनुवादनं, तदुपरि शोधानुसन्धानादि चाङ्गलभाषायां, कदाचिच्च वङ्ग-हिन्द्यादिभाषास्वपि क्रियेत, इत्येतदेवाऽऽसीद् भारतीयानां विश्वविद्यालयानामुद्देश्यम्। प्राचीनग्रीक-लैटिनादिवदियमपि पुरातनी भाषाऽस्ति यस्यां मन्त्रपाठादिकं, कर्मकाण्डादिकं चानुष्ठीयते, यस्याः प्राचीनं साहित्यं शोधार्थिभिरनुशील्यते, अनुसन्धीयते च। न कश्चिदवद्या प्राचीनग्रीकभाषायां लैटिनभाषायां वा काव्यरचनामुपन्यासलेखनं वा कर्तुं कल्पयेदपि। अतः संस्कृतभाषाऽपि क्लासिकलभाषात्वेन ग्रीक-लैटिनादिवदनुसन्धानपात्रमेवाऽस्तीति मन्वानानां विदुषामभूत्सा धारा।

अन्याऽभूदेका तादृशी धारा यस्या विद्वांसो जीवितानामाधुनिकभाषाणां पङ्क्तौ संस्कृतं परिगणयन्ति स्म, संस्कृते संभाषन्ते स्म, कवयन्ति स्म, पत्रलेखनादि कुर्वन्ति स्म, कविसम्मलेनादीनामायोजनं कुर्वन्ति स्म, कथालेखनं, विनोदालापांश्चापि कुर्वन्तिस्म। एतस्यैवाऽभूदयं परिणामो यद् यदा मुद्रणालयानां प्रसारवशात्

''पत्रकारता'' प्रारभ्यत भारतीयभाषासु, तदा संस्कृत-पत्रपत्रिका अपि ''विद्योदय'' सदृश्यः प्राकाश्यन्त (न केवलं पण्डित पत्रिका सदृश्यः) या अवलोक्य चित्रीयन्ते स्म वैदेशिकाः। एवंविधासु पत्रिकासु सर्जनात्मकं साहित्यं विपुलमात्रायां प्रकाशयितुमारेभिरे सम्पादकाः। सहस्रशः संस्कृत-सर्जकास्तु विद्यन्ते स्मैव तदानीं देशे। एतस्याभूत् स्वाभाविकः परिणामो यदूनविंश्याः शताब्द्या अन्तिमे चरणे विंश्याः शताब्द्याः पूर्वार्धे च सुमहति परिमाणे संस्कृतभाषां काव्य-नाटक-कथोपन्यास-निबन्धादिकस्य ''सर्जनात्मक'' साहित्यस्य सर्जनमभूद् देशे यस्य प्रकाशनं कदाचित् पूर्वं पत्रिकास्वभूत्, तदनु ग्रन्थाकारेषु, कदाचिच्च ग्रन्थरूप एव तदवततार। पं. अम्बिकादत्त व्यासस्य सुविदित उपन्यासः ''शिवराज-विजय'' इत्याख्यः पूर्वं क्रमिकरूपेण संस्कृतचन्द्रिका पत्रिकायां प्राकाश्यत, तदनु ग्रन्थरूपेण।

**नूतन साहित्यम्**- इत्थमस्या नूतनधारायाः प्रयासानां परिणामवशात् संस्कृते जीवन्तीष्वाधुनिकभाषास्विव तादृशं सर्जनात्मकसाहित्यमनवरतमवततार। तत्र च पत्रकारतायाः सर्वाधिकमुल्लेखनीयमवदानमभूत्। अत एव बहवस्तादृशाः संस्कृतपत्रकाराः प्रादुरभवन् ये सुललितसर्जनात्मकसाहित्यस्य प्रणेतारोऽप्यभवन्, पत्रकारा अपि। तादृशेषु सर्जकेषु सर्वप्रथममुल्लेखनीयो-ऽस्ति वाङ्गो विद्वत्तल्लजः पं. हृषीकेश भट्टाचार्यो यो हि वङ्गदेशात् सुदूरं पश्चिमोत्तरप्रदेशे लाहौरनगरे विश्वविद्यालयीयशिक्षातंत्रेणाऽऽकारितस्तत्र प्रापत् ''विद्योदय'' नामकस्य संस्कृतपत्रस्य चाऽऽरम्भमकरोत् यत्र सर्जनात्मकं साहित्यं सुभृशं प्राकाश्यत। सपद्येव तदनु पत्रमिदं वङ्गदेशमागमत्। अत्र हि भट्टाचार्यैर्ललितक-थाललित-निबन्ध-विनोदव्यंग्यादि हृदयावर्जकं साहित्यं प्रकाशयितुमारब्धम्। सेयं धारा संस्कृतचन्द्रिका-संस्कृतरत्नाकरादि विविध-पत्र-रूपेण सततं प्रावहत्, भूयांसं च साहित्यभाण्डागारमवतारयामास संस्कृते। संस्कृतचन्द्रिका सम्पादकः पं. अप्पाशास्त्री राशिवडे-करोऽपि सर्जनात्मकसाहित्यस्य सुविदितः प्रणेताऽभूत् (महाराष्ट्रीयः), संस्कृतरत्नाकरसम्पादको देवर्षिभट्ट-मथुरानाथशास्त्री अपि कविशिरोमणिः कथाकारो ललितनिबन्धकारश्चाऽभूत् (राजस्थानीयः)। तदनु ''संस्कृतप्रतिभा'' (भारतीय साहित्यअकादम्याः संस्कृतमुखपत्र) सम्पादको डॉ. वेङ्कटराघवन् (दक्षिण भारतीयः) अपि स्वयं नाटककारः कविश्चाऽभूत्, तमेव पन्थानं चानुससार।

सर्जनात्मकसाहित्ये नवजागरणस्य येयं धारा संस्कृते प्रावहत् तत्परिणामस्वरूपमेवाद्यत्वे सुविपुले परिमाणेऽ-भिनवं संस्कृतसाहित्यमुपलभ्यते यस्येतिहासोऽपि प्रारभ्यताऽभिलेखितुं स्व. डॉ. बलदेव उपाध्यायानां प्रधानसमम्पादकत्वे प्रकाशितस्य ''संस्कृतवाङ्मय का बृहत् इतिहास'' नामकग्रन्थराशेः सप्तमखण्डरूपेण, अन्येषु च ग्रन्थेषु, अतएव चाऽऽधुनिककालीनस्य संस्कृतसाहित्यस्य यद् युगविभाजनं व्यधीयत, तस्य नामकरणमपि सर्जक-पत्रकार-युगप्रवर्तकत्वेन महतीं भूमिकां निरूढवतां विदुषां नामभिरक्रियत-अप्पाशास्त्री राशिवडेकरयुगम् (1890-1930 ई.) भट्टमथुरानाथ-शास्त्रियुगम् (1930-1960 ई.) डॉ. वी. राधवन् युगं (1960-1980 ई.) चेत्यादि।

अस्मिन् विपुले नूतनसाहित्यभाण्डागारे नूतन-विधानां, नूतन-विषय-शिल्प-शैल्यादीनां चाऽवतारणां विधाय विलिखितं काव्य-कथा-नाटक-निबन्धादि-साहित्यं विस्मयावहां लोकाप्रियतामभजत्। तदैव तु विंटरनिट्जादयः शार्मण्यदेशीयाः साहित्येतिहासका-रास्तादिदं कथयितुं विवशा अभूवन् यत् संस्कृतसदृशी प्राचीना, क्लासिकलभाषा एतादृशीं जीवनशक्तिं धारयतीति कः खलु विश्वसेद् यदस्यां पत्रपत्रिकाः प्रकाश्यन्ते, कविसम्मेलनानि भवन्ति, सजीवं नूतन-साहित्यं च निर्मीयते।

अनेनैव नूतनसाहित्येन संस्कृतगिरं केवलं पुस्तकस्थां, क्लासिकलभाषां, शोधपात्रीभूतां भाषां, मृतभाषां वा व्यपदिशतां पाश्चात्यमतानुवर्तिनां मुखमुद्रणं कृतमभूत्। अत एव तदानीं पं. हृषीकेशभट्टाचार्यस्य ''उद्भिज्जपरिषद्'' इत्यादीन् निबन्धान् ''आत्मवायोरुद्गार'' इत्यादीन् विनोदगर्भा आत्मवृत्तादिविधाश्च लोकप्रिया अनुभूय प्रसेधितान्यभूवन्नेतादृशानि पद्यानि- ''मुद्रयति वदनविवरं मृतभाषावादिनां मुहेराणाम्। स्मरयति च भट्टबाणं भट्टाचार्यस्य सा वाणी।।'' (मुहेरो मूर्खः।)

तादृशं सर्जनात्मकं साहित्यमद्यावधि विपुले परिमाणे सृज्यते, प्रकाश्यते, समीक्ष्यते, समाद्रियते, पुरस्क्रियते च साहित्य-अकादमी-संस्कृत अकादमी प्रभृतिभिः संस्थाभिरिति सुमहत् सौभाग्यमस्माकममरभाषा-सेवकानाम्। अद्यापि भारतीयेषु बहुसंकायीयेषु विश्वविद्यालयेषु मानविकीसंकायान्तर्गतः संस्कृत-विभागोऽपि विद्यते यत्र संस्कृतस्य वाङ्मयम् अर्थात् प्राचीनं वरेण्यसाहित्यं वेदोपनिषन्महाकाव्यनाटकादि-रूपं पाठ्यते, तदुपर्यनुसन्धानकार्यं क्रियते, पी.एच.डी. इत्यादय उपाधयः प्रदीयन्ते। एवंविधस्य शिक्षणस्य, परीक्षणस्य, लेखनस्य च माध्यमरूपेण हिन्दीभाषा, आङ्गलभाषा, अन्याश्च भारतीय भाषा उपयुज्यन्ते प्रायशः। संस्कृतमाध्यमेन तत्राल्पीय एव कार्यं भवति, न वा भवति। अपरतस्तु गताया विंश्याः शताब्द्या उत्तरार्धे प्रवृत्तायाः संस्कृविश्वविद्यालय-स्थापनपरम्परायाः कारणात् संस्कृतस्यैव विविधविषयाणामनुशीलनाय संस्थापितानां विश्वविद्यालयानां शिक्षण-परीक्षण-लेखनादिकार्येषु संस्कृतभाषैव माध्यमत्वं बिभर्ति।

**पाठ्यचर्यापरिष्कारः** - द्वयोरपि विश्वविद्यालय-प्रकारयोरनयोः पाठ्यक्रमेषु यत् ''साहित्यं'' साहित्य-विषयमङ्गीकृतवत्सु छात्रेषु पाठ्यते, तत्र कालिदासादयः प्राचीना महाकवयः, जगन्नाथपण्डितराजादयो मध्य-कालीना विद्वांसो वा पाठ्यक्रमेषु निर्धार्यन्ते, नवयुगीना अर्वाचीनाः साहित्यसर्जकाः प्रायशः पाठ्यक्रमेषु नावतरन्तिस्म कतिपयदशकेभ्यः पूर्वम्। वाराणस्या-दिनगरीयैः पाठ्यक्रमनिर्धारकैः कृपापूर्वकमर्वाचीनेषु साहित्यकारेषु दयमानैः केवलमम्बिकादत्तव्यासोपरि कृपाकृताऽभूद् यत्तस्य ''शिवराजविजया'' ख्य उपन्यासः पाठ्यक्रमे निरधार्यत। नापरः साहित्यकारः प्रवेशमलभत बहोः कालात्। इत्थं केवलं क्लासिकल साहित्यपाठनस्य परिणतिरियमभूद् यत्तादृशः स्नातकः शास्त्रीयान् विषयान् संस्कृते वक्तुं, लेखितुं चावश्यं प्रभवति किन्त्वाधुनिके युगे यादृशं जीवनं प्रवर्तते, या घटना घटन्ते, तासां वर्णनं कर्तुं संस्कृते न प्रभवति। कथं क्षमेत स तथा कर्तुम् ?

''बाष्पयान (रेल) विश्रमस्थले (स्टेशन) यदा चिटिका (टिकिट), क्रयणायाहं गतोऽभूवं तदा मम पटपुटकं छिन्नम् (जेब कट गई)'' इत्यादि वास्तविक-वृत्तस्य लेखनं यदि संस्कृते करणीयं स्यात् तदा वराकः साहित्याचार्यपरीक्षोत्तीर्णोऽपि कथं प्रभवेत्? रेल-स्टेशन-टिकिट इत्यादीनि प्रमेयानि शिवराजविजये तु न सन्ति, न कालिदासे, न बाणाभट्टे। कुत्र लभेत स तत्कृते शब्दराशिम्? अतस्तादृशीष्वभिव्यक्तिष्वपि छात्राणां बुद्धिः प्रसरेदित्येतदर्थं बहुभिर्विवेकिभिर्विश्वविद्यालयै-राधुनिकसाहित्यान्तर्गतानि पुस्तकान्यपि पाठ्यक्रमेषु विनिर्धारितानि यत्राधुनिकाः शब्दाः प्राप्येरन्। एवंविधेषु विश्वविद्यालयेषु दयालबाग आगरा प्रभृतयोऽप्यभूवन्, राजस्थानीया विश्वविद्यालया अप्यभूवन्। बहुभिस्तु पुराणपथपथिकैः पाठ्यक्रमनिर्धारकैरेवंविधस्य नूतन-युगीनविकासस्यावश्यकतैव नानुभूता स्यादिति तु कथान्तरम्।

किन्तु तदिदं तु स्पष्टतया सर्वैरनुभूयेतैव यदद्य यदि

द्वितीयधारानुरूपं संस्कृतभाषा ''जीविता'', आधुनिकी, प्रयुज्यमाना च भाषा साधयितुमिष्यतेऽस्माभिस्तर्हि वर्तमानयुगीनानां सर्वविधानामभिव्यक्तीनामवतारणा संस्कृते करणीया स्यात्, संस्कृते जीवनानुभवान् अभिव्यञ्जयितुमस्माकं छात्रा अपि समर्थीकरणीयाः स्युः। तदर्थमाधुनिकं संस्कृतसाहित्यमेवैकमात्रं साधनं भवितुमर्हति, नान्यः पन्था विद्यतेऽयनाय। अत एव नूतनं साहित्यं संस्कृते सृज्यते इत्यप्यावश्यकं, तत् प्रकाश्येत इत्यप्यावश्यकं, तस्य निर्धारणं पाठ्यक्रमेषु क्रियेत, इत्यप्यावश्यकम्।

**प्रकाशनोपक्रमाः** - सुमहत् सौभाग्यमस्माकं यदेवंविधा अपेक्षाः प्रति किञ्चिदवधानं वरिष्ठैः प्रशासकैः शिक्षाशास्त्रिभिश्च प्रदातुमारब्धमस्ति। नूतनसाहित्य सर्जनं प्रोत्साह्यत इति तु सूचित चरमेवोपरितनासु पंक्तिषु, बहुत्र पाठ्यक्रमेष्वपि नूतनसाहित्यं निर्धार्यते। नूतनसाहित्य समीक्षणाय ''दृक्'' सदृश्यः पत्रिका अपि प्रकाश्यन्ते, ग्रन्थप्रकाशनमपि प्रोत्साह्यते। तादृशेषूपक्रमेषु भारत-सर्वकारीयं राष्ट्रियसंस्कृतसंस्थानं यद्धि शासनस्य सर्वतः प्रमुखं संस्थानमस्ति, विपुलं समर्थनं, वित्तीय-साहाय्यादिकं च प्रददातीति सुतरां हर्षावहम्। अनेन संस्थानेन नूतनसाहित्यप्रकाशनस्य, तदर्थं वित्तीयानुदान-स्य, तत्समीक्षणस्य, विविधभाषासु सृष्टस्योत्कृष्टस्य साहित्यस्यानुवादानां प्रवर्तनस्यापि च कार्यक्रमाः परिचाल्यन्त इत्यपि प्रमोदावहम्।

संस्थानस्यास्य पूर्वकुलपतिभिः डॉराधावल्लभ-त्रिपाठिभिः स्वयं नूतनसाहित्यसर्जनलब्धयशस्कैर्यदवधि कार्यभारोऽस्य गृहीतस्तदवधि तैः कतिपये तादृशा उपक्रमा अपि प्रारभ्यन्त यैः संस्कृते नवयुगीन विकासस्योपबृंहणं प्रतिफलितं दृश्येत। तादृशेष्वेवोप-क्रमेष्वेकतमोऽस्ति संस्कृतस्यार्वाचीनानां साहित्य-काराणां समग्र-ग्रन्थमालायाः प्रकाशनम्। लोकप्रिय-ग्रन्थमालानाम्ना तादृशानां साहित्यसर्जकाणां समस्तानां कृतीनां ग्रन्थरूपेणावतारणं महदुपयोगि स्याद् यैः प्रभूते परिमाणे विविधासु विधासु संस्कृते सर्जनात्मक-साहित्यमवतार्य संस्कृतं जीवितभाषा ख्यापिताऽभूत्, नवजागरणस्य स शङ्खनादः कृतोऽभूद् यस्य विवरणं मया गतेषु प्रघट्टकेषु प्रस्तुतमस्ति।

एवंविधा एव साहित्यसर्जका अभूवन् भारत्याः स्वनामधन्याः प्रधानसम्पादकचराः मम पितृचरणाः कविशिरोमणि-देवर्षिभट्टश्रीमथुरानाथशास्त्रिपादाः यैः संस्कृतकाव्यसर्जनायां नूतनच्छन्दसां,नूतनशैलीनां नूतनकथ्यानां चाऽवतारणा कृताऽभूत्, गजलगीति-रचनायाः प्रवर्तनं कृतमभूत्, ललितनिबन्धा जनिता अभूवन्, कथासर्जनस्य नैका विधाः प्रावर्त्यन्त, विनोदोक्तीनां प्रकाशनं प्रारब्धमभूत्, ग्रन्थसमीक्षणं प्रवर्तितमभूत्, संस्कृत पत्रकारतायां नूतनं युगमानायितम-भूत् ''संस्कृतरत्नाकर'' ''भारती'' प्रभृतिपत्राणां सम्पादनद्वारा। तेषां संस्कृते साहित्यसृष्टिर्लक्षाधिकेषु पृष्ठेषु प्रसृताऽस्ति। तेषां बहवो ग्रन्थाः प्राक् प्रकाशिता अद्य सुदुर्लभाः। तत्सम्पादितपत्रिकादीनां प्राप्तिरप्यद्य कठिना। तेषां लोकप्रियाणां सर्जनात्मकसाहित्यकृती-नामवतारणा ग्रन्थमालारूपेण क्रियेतेति संस्थानस्य शुभसङ्कल्पो यदा मह्यमसूच्यत, सुमहान् सन्तोषः ''सार्थकता'' बोधश्च कश्चिदुदियाय मन्मनसि। पद्ये गद्ये (कथोपन्यासादिषु) च तेषां सर्जनस्यास्ति विपुलं परिमाणम्। अतः क्रमिकरूपेण विभिन्नेषु पञ्चसु भागेषु प्राकाश्यत सेयं ग्रन्थमाला ''मञ्जुनाथग्रन्थावलिनाम्ना'' एवमेव पं. परमानन्दशास्त्रिणां (अलीगढस्थानाम्) ग्रन्थावलिरपि प्रकाशिताऽस्ति। सर्वथा संग्रहणीया अध्येतव्याश्च सन्ति ग्रन्थमाला इमाः।

बालोपयोगिनी जीवनवृत्तमाला

# भारतभूम्याः विभूतयः

❑ अविनाश शर्मा

प्रह्लादः - प्रह्लादः दैत्यराजहिरण्यकशिपोः सकाशात् कमलायां जातः। बाल्यकालादेव प्रह्लादः उत्कटो भगवद्भक्त आसीत्। स प्रह्लादाय विविधानि कष्टानि प्रदाय विष्णुभक्त्याः तं परावर्तयितुं चेष्टितवान्। प्रह्लादस्य भगवद्भक्तिः सर्वासु विपत्तिषु उत्तरोत्तरं वर्धमाना एव जाता। अन्ततो गत्वा प्रह्लादस्य रक्षणार्थं भगवान् स्वयं नृसिंहस्य रूपं धृत्वा प्रकटितोऽभूत्, हिरण्यकशिपोश्च वधः तेन कृतः- इति पौराणिकी कथा प्रचलितास्ति।

नारदः - नारदः ब्रह्मदेवस्य मानसपुत्रः महान् वैष्णवश्चासीत्। भगवद्भक्तेः प्रसारार्थं स आसीत् सर्वत्र भ्रमणशीलः। तेन भगवान् व्यासः श्रीमद्भागवतग्रन्थं लेखितुं प्रेरितः। पुराणेषु नारदसम्बन्धिन्यः अनेकाः कथाः वर्णिताः सन्ति। स संगीतविशेषज्ञोऽप्यासीत्। श्रेष्ठो वैष्णवः तथा भक्तिमार्गस्य प्रवर्तकः इति कृत्वा नारदः जनैः पूज्यते।

भगीरथः - भगीरथः दिलीपराजपुत्र आसीत्। मत्स्यपुराणे 12 अध्याये यथा-

'असमञ्जसस्य तनयो ह्यंशुमान् नाम विश्रुतः।
तस्य पुत्रो दिलीपस्तु दिलीपस्य भगीरथः।।'

कपिलमुनिशापेन भस्मीभूतानां पितॄणां सगरसुतानामुद्धरणाय अनेन धोरतपश्चर्यां कृत्वा मृत्युलोके गङ्गा आनीता। यथा-

येन भागीरथी गङ्गा तपः कृत्वावतारिता।
भगीरथस्य तनयो नाभाग इति विश्रुतः।।

अस्मिन् कर्मणि तस्यान्ये सर्वे पूर्वजाः न सफला बभूवुः। गङ्गाया भागीरथीति संज्ञा भगीरथस्यैव कारणात् संजाताः। स्वर्गादागत्य गङ्गया पृथिव्योपरि भगीरथस्यानुगमनं कुर्वन्त्या तथा स्वप्रवाहेण सगरसुतानां ( भगीरथपूर्वजानां ) उद्धारः कृतः।

विश्वकर्मा: - ऋग्वेदे विश्वकर्मणः देवस्वरूपे वर्णनं कृतमस्ति। विश्वकर्मणा स्वपादैः स्वर्गलोकस्य हस्तैश्च पृथिव्यां निर्माणं कृतम्। देवानां नगराणि इन्द्रप्रस्थम्, द्वारकापुरी, वृन्दावनम् इत्यादिनगराणां तथा विष्णोः सुदर्शनचक्रम्, शिवस्य त्रिशूलम्, इन्द्रस्य वज्रम् ( दधीचिऋषेः अस्थिभिः निर्मितम् ) रुद्रस्य स्यन्दनम् ( त्रिपुरदहनार्थम् ) विश्वकर्मणा निर्मितानि सन्ति। मत्स्यपुराणे 5 अध्याये यथा-

विश्वकर्मा प्रभासस्य पुत्रः शिल्पः प्रजापतिः।
प्रासादभवनोद्यानप्रतिमाभूषणादिषु।
तडागारामकूपेषु स्मृतः सोऽमरवर्द्धकिः।।

कश्यपऋषिणा विश्वकर्मण अभिषेकः कृतः तदा विश्वकर्मा सम्राडभूत्। विश्वजित् नामके यज्ञे विश्वकर्मणा कश्यपऋषये पृथ्वीदानं कृतम्।

वाल्मीकिः - वाल्मीकिः युवावस्थायां किरातादिभिः सह लुण्ठनादिकं कृत्यं कृत्वा जीविकोपार्जने रत आसीत्। देवर्षिनारदस्य उपदेशेन स 'राम' नाम्नः जपं सुदीर्घकालपर्यन्तं एकस्मिन् स्थले स्थित्वा चकार। तस्मिन् सुदीर्घकाले तस्य देहोपरि वल्मीकस्य संचयोऽभूत् तेन सः वाल्मीकिरिति नाम प्राप्तवान्। तदनन्तरं वाल्मीकि ऋषिः बभूव। तमसायाः तटे तस्य आश्रम आसीत्। एकदा एकेन व्याधेन क्रौञ्चमिथुनादेकस्य नरपक्षिणः बाणेन वधः

**कृतः। वाल्मीकेः अन्तःकरणमेतेन विद्धमभूत्। तस्य मुखात् ततः छन्दोबद्धाः शापवाणी निःसृताऽभूत्।**

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौंचमिथुनादेकमवधीः काममोहितम्।।**

**अनेन ब्रह्मदेवः प्रकटितो भूत्वा वरमदात्। त्वम् आदिकविरसि, स्वस्य कवित्वशक्तेः विनियोगं रामचरितरचनायां कुरु। वाल्मीकिकृतं रामायणं अस्य संसारस्य आद्यं सर्वश्रेष्ठञ्च महाकाव्यमस्ति। रामायणग्रन्थस्य यादृशः प्रभावो भारतीयजनसमाज-स्यान्तःकरणे संजातोऽभूत् न तादृशः इतर-काव्यानाञ्चाऽभूत् -**

**रावणान्तकरो राजा रघूणां वंशवर्धनः।**
**वाल्मीकिर्यस्य चरितं चक्रे भार्गवसत्तमः।।**

**मत्स्यपुराणे 12 अध्याये।**

**श्रीरामचन्द्रेण यदा सीतादेव्याः परित्यागः कृतः तदा श्रीवाल्मीकिना एव तस्याः द्वयोः पुत्रयोश्च ( लवकुशयोः ) परिपालनं कृतम्।**

## हिन्दी में

**प्रह्लादः**- प्रह्लाद दैत्यराज हिरण्यकशिपु का कमला के गर्भ में उत्पन्न पुत्र था। बाल्यकाल से ही प्रह्लाद उत्कट भगवद्भक्त था। हिरण्यकशिपु भक्ति मार्ग का तीव्र विरोधी था। उन्होंने प्रह्लाद को विविध प्रकार के कष्ट देकर विष्णुभक्ति से हटाने की चेष्टा की। प्रह्लाद की भगवद्भक्ति सारी विपत्तियों में उत्तरोत्तर बढती ही गई। आखिरकार प्रह्लाद की रक्षा के लिए भगवान् स्वयं नृसिंह रूप धरकर प्रकट हुए और हिरण्यकशिपु का उन्होंने वध किया। यह पौराणिक कथा प्रचलित है।

**नारदः**- नारद ब्रह्मदेव के मानस पुत्र महान् वैष्णव थे। भगवद्भक्ति के प्रसार हेतु वे सर्वत्र भ्रमणशील रहते थे। उन्होंने भगवान् व्यास को श्रीमद्भागवत ग्रन्थ लिखने को प्रेरित किया। वे संगीत विशेषज्ञ भी थे। श्रेष्ठ वैष्णव तथा भक्तिमार्ग के प्रवर्तक इस नाते नारद की लोग पूजा करते हैं।

**भगीरथः**- भगीरथ दिलीप के पुत्र थे। मत्स्य पुराण के 12 वें अध्याय में लिखा है कि असमञ्जस का पुत्र अंशुमान और उसका पुत्र दिलीप तथा उसका भगीरथ था। कपिल मुनि के शाप से भस्मीभूत अपने पितर सगरसुतों का उद्धार करने के लिए इनके द्वारा घोर तपश्चर्या करके मृत्युलोक में गङ्गा लाई। भगीरथ का पुत्र नाभाग इस नाम से प्रख्यात है। इस कार्य में उसके अन्य सभी पूर्वज सफल नहीं हुए थे। गङ्गा का भागीरथी यह नाम भगीरथ के कारण हुआ। स्वर्ग से आकर गङ्गा ने पृथिवी पर भगीरथ का अनुगमन करते हुए अपने प्रवाह से सगरसुतों का ( भगीरथ के पूर्वजों का) उद्धार किया।

**विश्वकर्माः**- ऋग्वेद में विश्वकर्मा का देवस्वरूप में वर्णन किया है। विश्वकर्मा ने अपने पैरों से स्वर्गलोक, हाथों से पृथ्वी का निर्माण किया। देवों के नगर इन्द्रप्रस्थ, द्वारकापुरी, वृन्दावन इत्यादि नगरों का तथा विष्णु का सुदर्शन चक्र, शिव का त्रिशूल, इन्द्र का वज्र, (दधीचि ऋषि की अस्थियों से निर्मित), रुद्र का रथ (त्रिपुरदहन हेतु) विश्वकर्मा ने निर्मित किए। मत्स्यपुराण में 5 वें अध्याय में लिखा है कि विश्वकर्मा प्रभास के पुत्र शिल्प प्रजापति थे, वे प्रासाद, भवन, उद्यान, प्रतिमा, भूषणादि तथा तालाब, बगीचे, कुए बनाने वाले देवताओं के हितैषी थे। कश्यप ऋषि ने विश्वकर्मा का अभिषेक किया था। तब विश्वकर्मा भी सम्राट् हो गए थे। विश्वजित् नाम के यज्ञ में विश्वकर्मा ने कश्यप ऋषि को पृथ्वी दान की थी।

**वाल्मीकि :**- वाल्मीकि युवावस्था में किरात

आदियों के साथ लूटना आदि कृत्य करके जीविकोपार्जन करते थे। देवर्षि नारद के उपदेश से उन्होंने 'राम' नाम का जप बहुत लम्बे समय तक एक स्थान पर बैठकर किया। उस सुदीर्घ काल में उनके देह पर वल्मीक (मिट्टी) का संचय हो गया था। इससे उन्हें वाल्मीकि यह नाम प्राप्त हुआ। इसके पश्चात् वाल्मीकि ऋषि हुए। तमसा के तट पर उनका आश्रम था। एक बार एक व्याध ने क्रौंच जोड़े में से एक नरपक्षी को बाण से मार दिया था। वाल्मीकि का अन्तःकरण इससे बिंध गया। उनके मुख से उसी समय छन्दोबद्ध शापवाणी निकली। 'रे व्याध ! तू सदैव चलने वाली प्रतिष्ठा को प्राप्त न करे, क्योंकि तुम काम मोहित क्रौंचपक्षियों के जोड़े में से एक का वध कर दिया।' इससे ब्रह्मदेव ने प्रगट होकर उन्हें वरदान दिया। तू आदि कवि है, अपनी कवित्वशक्ति के विनियोग से रामचरित्र की रचना कर। वाल्मीकि कृत रामायण इस संसार का आदि और सर्वश्रेष्ठ महाकाव्य है। रामायण ग्रन्थ का जैसा प्रभाव भारतीय जनसमाज के अन्तःकरण में हुआ है वैसा इतर काव्यों का नहीं हुआ। 'रावण का संहार करने वाले रघुवंश के यश का वर्धन करने वाले राजा राम के चरित्र का भार्गवों में श्रेष्ठ वाल्मीकि ने वर्णन किया'। श्री रामचन्द्र ने जब सीतादेवी का परित्याग किया था तब श्रीवाल्मीकि ने ही उसका और उसके लव कुश दोनों पुत्रों का परिपालन किया।

**किशनपोल बाजारः, जयपुरम्**

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**विस्मृतं पतितं नष्टमदत्तं बुधनिन्दितम्।**
**धनधान्यादि सर्वं च परस्वं त्यज सर्वदा।।**

– जो भूला हुआ हो, गिरा हुआ हो, नष्ट हुआ हो, बुद्धिमानों द्वारा निन्दित हो, बिना दिया हुआ हो, ऐसा धनधान्यादि पर पदार्थ सर्वदा छोड़ो।

**पर द्रव्यं समादत्ते यो मूढो वञ्चनादिभिः।**
**स्थितं तस्य गृहाद्याति दारिद्रयं सन्मुखायते।।**

– जो मूर्ख मनुष्य धोखे से दूसरे के धन को लेता है, उसका घर में स्थित धन भी चला जाता है और दरिद्रता उसके सन्मुख आ जाती है।

**परद्रव्यमतिस्तोकं यो गृह्णाति स तस्करः।**
**वधबन्धादिकं प्राप्य श्वभ्रं गच्छति दुर्मतिः।।**

– जो दुर्मति (दुर्बुद्धि) मनुष्य दूसरों के अत्यन्त अल्प धन को भी ग्रहण करता है, वह चोर है। वह वध-बन्धादिक को प्राप्त कर नरक जाता है।

**सत्याचरणाल्लक्ष्मीः स्वयमप्यायाति पुण्ययुक्तस्य।**
**असदाचारस्य पुनः स्थिता चापि संनश्यति।।**

– सत्य आचरण से पुण्यात्मा जीव को लक्ष्मी स्वयं ही प्राप्त होती है। और असद् आचरण से घर में स्थित भी लक्ष्मी नष्ट हो जाती है।

**सकलविबुधनिन्द्यं दुःखसंतापबीजं,**
**विषमनरकमार्गं बन्धविच्छेदहेतुम्।।**
**कुगतिकरमसारं पापवृक्षस्य कन्दं,**
**त्यज सकलमदत्तं त्वं सदा मुक्तिहेतोः।।**

–समस्त बुद्धिमानों के द्वारा जो निन्दनीय है, दुःख और संताप का मूल कारक है, विषम नरक का मार्ग है, बन्ध और नाश का कारण है, कुगति को करने वाला है, असार है, पाप रूप वृक्ष का समूह है, ऐसे समस्त अदत्त वस्तु (बिना दिये हुए) को मुक्ति प्राप्ति हेतु तुम छोड़ो।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

# श्रीमद्वाल्मीकीयरामायणवर्णितं धर्मस्वरूपम्

❑ ओमप्रकाश अग्रवालः

वैदिकसंस्कृत्यां चत्वारः पुरुषार्थाः प्रोक्ता- धर्मार्थकाममोक्षाः। तेषु प्रथमः पुरुषार्थोऽस्ति धर्मः। तद्धर्मस्य पूर्तये अन्यानि शास्त्राण्यपि सहायकानि भवन्ति। धर्मशास्त्रेषु यथा को धर्मः? कथम् आचरणीयः? इत्यादि विषयान् आधृत्य चर्चा विहिताऽस्ति। विषयाणामेषां वर्णनं धर्मशास्त्रातिरिक्तं पुराणेष्वपि प्राप्यते। तत्र पुराणेष्वपि धर्मस्य तावत्येवावश्यकता महत्ता च स्वीकृता अस्ति यावती स्मृत्यादिधर्मशास्त्रेषु। अतो ग्रन्थैरेतैः धर्मः एतावान् विस्तृततया परिपुष्टतया प्रामाणिकतया च प्रस्तुतः, कारणं धर्मस्य गणना चतुर्षु पुरुषार्थेषु प्रथमपुरुषार्थत्वेन भवति। प्रश्नोऽस्ति अत्र यत् वाल्मीकिरामायणे धर्मस्य स्वरूपं किमस्तीति? तर्हि यदा वाल्मीकिरामायणस्याध्ययनं कुर्मस्तदा प्रारम्भे एव महर्षि-वाल्मीकिना लिखितं यत्-

**कोन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्।**
**धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः।। वा.रा. (1/1/2)**

रामायणे वाल्मीकिः तपः स्वाध्यायनिरतं मुनिवरश्रेष्ठं नारदं पृच्छति यत् अस्मिन् लोके को गुणवान्, वीर्यवान्, कृतज्ञः सत्यवक्ता तथा च धर्मज्ञोऽस्ति यस्याऽहं चरित्रं लिखेयम्? प्रश्नस्यास्योत्तरं स्वयं रामायणे एव प्राप्यते-

**रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः।**
**राजा सर्वस्य लोकस्य देवानामिव वासवः।।**
**वा.रा. ( 3/37/13 )**

अर्थात् श्रीरामो धर्मस्य मूर्तिमान् स्वरूपोऽस्ति। स साधुः सत्यपराक्रमी चास्ति। यथा इन्द्रः सर्वदेवानां अधिपतिः, तद्वदेव श्रीरामोऽपि सम्पूर्णजगतः राजाऽस्ति।

अनेनेदं सिद्ध्यति यत् ''कोन्वस्मिन् साम्प्रतं लोके'' इत्यस्य प्रश्नस्योत्तरे ''रामो विग्रहवान् धर्मः'' इत्युक्तत्वात् अनयोः संगतिः वाल्मीकिरामायणे भवत्येव। अर्थात् भगवन्तं रामं साक्षाद् धर्मस्वरूपत्वात् समाजः स्वीकरोति।भगवता रामेण आजीवनं यत्किमपि कार्यं निष्पादितं तत् सर्वं धर्माधारितमेवासीत्। मम विचारानुसारं यथा आदिकाव्यत्वेन रामायणमस्ति तद्वदेव आदिधर्म-काव्यत्वेनाऽपि रामायणमेव भवेत्।

साधारणतया जना विचारयन्ति यत् धर्मपालने सत्यस्य तथा सत्यपालने च धर्मस्य प्रामुख्यम्। अत एव स्वे-स्वेधर्मे निष्ठावन्तो जना अपि असत्यभाषणे संकोचं न अनुभवन्ति। तद्वदेव सत्यनिष्ठजनाः सत्यपालने न धर्मस्य उल्लङ्घनेऽपि संकोचं कुर्वन्ति। इदं तावत्सत्यधर्मयोस्तेषां यथावदन-वगमनमेव। तथ्यमिदं भगवान् वाल्मीकिः सर्वत्रैव घोषितवान्। श्रीरामद्वारा जाबालिमतखण्डनावसरे रामायणकविरिदं तथ्यं प्रस्तौति-

**''सत्यमेव धर्मः''**

**सत्यमेवेश्वरो लोके सत्ये धर्मस्सदाश्रितः।**
**सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम्।।**
**ऋषयश्चैव देवाश्च सत्यमेव हि मेनिरे।**
**सत्यवादी च लोकेऽस्मिन् परं गच्छति चाक्षयम्।।**
**वा. रा. ( 2/109/13-11 )**

इदमनेन स्पष्टं भवति यत् वेदोक्तो धर्मो यो दान-याग-होम-तपादिरूपः स सत्यपालनेन सार्थको भवति। वेदस्य धर्मे यद् अखण्डितं प्रामाण्यं तदपि सत्यमूलकमेव। सृष्टि-स्थिति-लयकारक ईश्वरोऽपि सत्यस्वरूप एव। धर्मोऽपि सदा सत्याश्रितो भवति। असत्यमूलको धर्माभास एव, न तु धर्मः।

सत्यस्य व्रतमिदं न केवलं व्यक्तिजीवने एवाऽपितु सामाजिके पारिवारिके च जीवने राजनीत्यामपि परिपाल्यं भवति। अत एव भगवान् श्रीरामो भणति। यथा-

**सत्यमेवानृशंसञ्च राजवृत्तं सनातनः।**
**तस्मात्सत्यात्मकं राज्यं सत्ये लोकः प्रतिष्ठितः।।**
**वा. रा. ( 2/109/10 )**

श्रीरामः राज्यशासने सत्यस्य उपेक्षया जायमानं अनर्थमपि निर्दिशन् वदति-

**कामवृत्तो न्वयं लोकः कृत्स्नस्समुपवर्तते।**
**यद्वृतास्सन्ति राजानस्तद्वृत्तास्सन्ति हि प्रजाः।।**
**वा.रा. ( 2/109/9 )**

वेदाः मानवजीवनस्य परमप्रयोजनं सत्योपलब्धिरेव निर्दिशन्ति। ज्ञानविज्ञानयोः मुख्यं प्रयोजनमपि सत्योपलब्धिरेव। सत्यधर्मयोः पालनेन मनुष्यस्स्वं चित्तं निर्मलं कर्तुं शक्नोति। अत एव रामायणमिदं स्पष्टं उद्घोषयति यत्–

**सत्यधर्मातिरक्तानां नास्ति मृत्युकृतं भयम्।**
**वा.रा. ( 3/46/34 )**

मनुष्यैः सत्य-धर्मयोः पालनेन मृत्युकृतं भयं पराजयितुं शक्यते। यदा तन्माता कौसल्या, वनाय प्रव्रजितं रामं, वृद्धं पतिं परित्यज्याऽनुगन्तुमिच्छति तदा स महात्मा तस्यै, देव्यै पत्नीत्वेन तस्याः स्वं धर्मं ज्ञापयन् वदति–

**''कौटुम्बिकधर्मः''**

**त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया।**
**पितुर्नियोगे स्थातव्यमेष धर्मस्सनातनः।।**
**वा. रा. ( 2/21/48-49 )**

**''पुत्र धर्मः''**

**नास्ति शक्तिः पितुर्वाक्यं समतिक्रमितुं मम।**
**प्रसादये त्वां शिरसा गन्तुमिच्छाम्यहं वनम्।।**
**नाऽहं धर्ममपूर्वं ते प्रतिकूलं प्रवर्तये।**
**पूर्वैरयमभिप्रेतो गतो मार्गोऽनुगम्यते।।**
**वा. रा. ( 2/21/30-36 )**

**''शिष्य धर्मः''**

गुरोर्विषये शिष्येण तदाज्ञापालानरूपोऽयं धर्मः यथाऽवश्यं पालनीयः तं ताटकावधम् आज्ञापयतो विश्वामित्रस्य पुरतो ज्ञापयन् वदति–

**सोऽहं पितुर्वचः श्रुत्वा शासनाद् ब्रह्मवादिनः।**
**करिष्यामि न संदेहस्ताटका वधमुत्तमम्।।**
**गोब्राह्मणहितार्थाय देशस्य च हिताय च।**
**तव चैवाऽप्रमेयस्य वचनं कर्तुमुद्यतः।।**
**वा. रा. ( 1/26/4-5 )**

**''भ्रातृधर्मः पुत्रधर्मश्च''**

सेनया सह चित्रकूटं रामं नेतुमागच्छन्तं भरतं दृष्ट्वा तस्मिन् किल्बिषं विशङ्क्य तं सपरिवारं जिघांसन्तं लक्ष्मणं वारयता रामेण भ्रातृणां पितुश्च विषये सर्वैरपि जनैः कथं वर्तितव्यमिति विषयं निरुपयता उक्तं यथा–

**यद्विना भरतं त्वां च शत्रुघ्नं वापि मानद।**
**भवेन्मम सुखं किंचिद्भस्म तत्कुरुतां शिखी।।**
**वा.रा. ( 2/97/8 )**

**कथं नु पुत्राः पितरं हन्युः कस्यांचिदापदि।**
**भ्राता वा भ्रातरं हन्यात्सौमित्रे प्राणमात्मनः।।**
**यदि राज्यस्य हेतोस्त्वमिमां वाचं प्रभाषसे।**
**वक्ष्यामि भरतं दृष्ट्वा राज्यमस्मै प्रदीयताम्।।**
**वा. रा. ( 2/97/16-17 )**

नूनमनेन भ्रातृणां मध्ये यः पारस्परिको विश्वासः पारस्परिकं च सौभ्रातृत्वमपेक्षितं तत्तु साधु निरूपितम्।

**''पत्युः धर्मः''**

पत्युः पत्न्या विषये यो धर्मोऽनुसरणीयस्तं निरूपयन् दैव्यै सीतायै श्रीरामः कथयति–

**यत्सृष्टाऽसि मया सार्धं वनवासाय मैथिलि।**
**न विहातुं मया शक्या प्रीतिरात्मवता यथा।।**
**धर्मस्तु गजनासोरु सद्भिराचरितः पुरा।**
**तं चाहमनुवर्तिष्ये यथा सूर्यं सुवर्चला।।**
**न खल्वहं न गच्छेयं वनं जनकनंदिनि।**
**वचनं तन्नयति मां पितुस्सत्योपबृंहितम्।।**
**वा. रा. ( 2/30/29-31 )**

**''पारिवारिको धर्मः''**

पारिवारिके धर्मे यथा माता-पित्रोरनुशासनस्य पालनमावश्यकम्, यथा च तद्भक्तिस्सर्वेषां पारिवारि-काणां जनानांमपेक्षिता। तथैव सामाजिके धर्मे गुरुवृद्धा-दीनामादरः तेषु भक्तिश्च कर्तव्या भवति। यत्र समाजे गुरुषु वृद्धेषु च आदरः न भवति, स समाजो विकासं कर्तुं न प्रभवति। इदमेव तथ्यं प्रकटयन् श्रीरामः कथयति–

**अस्वाधीनं कथं दैवं प्रकारैरभिराध्यते।**
**स्वाधीनं समतिक्रम्य मातरं पितरं गुरुम्।।**
**यत्र त्रयं त्रयो लोकाः पवित्रं तत्समं भुवि।**
**नाऽन्यदस्ति शुभापांगे तेनेदमभिराद्ध्यते।।**
**वा. रा. ( 2/30/33-34 )**

**''क्षत्रिय-धर्मः''**

भगवान् श्रीरामः शरणागतानाम् अभयदानरूपं कार्यं स्वसनातनं व्रतमेव मन्यते स्म। अत एव विभीषणस्याऽभयदानसंदर्भे स महात्मा स्वादिमं महत्तरं व्रतं सुग्रीवं प्रतिबोधयन् कथयति-

**बद्धाञ्जलिपुटं दीनं याचन्तं शरणागतं।**
**न हन्यादानृशंस्यार्थमपि शत्रुं परंतपः।।**
**आर्तो वा यदि वा तृप्तः परेषां शरणं गतः।**
**अरिः प्राणान्परित्यज्य रक्षितव्यः कृतात्मना।।**
**एष दोषो महानत्र प्रपन्नानामरक्षणे।**
**अस्वर्ग्यं चाऽयशस्यं च बलवीर्यविनाशनम्।।**
**वा. रा. ( 6/18/ 27, 28, 31 )**

एवं साधारणतः शरणागतरक्षणरूपधर्मस्य परिपालनस्यावश्यकता, तस्याऽपालनेन प्रत्यवायं चोद्भाव्य, अस्मिन् विषये स्वस्य निर्णयं प्रकटयञ्छ्रीरामो कथयति-

**सकृदेव प्रपन्नाय तवाऽस्मीति च याचते।**
**अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम।।**
**आनयैनं हरिश्रेष्ठ दत्तमस्याऽभयं मया।**
**विभीषणो वा सुग्रीवो यदि वा रावणस्स्वयम्।।**
**वा.रा. ( 6/18/33-34 )**

**''चारित्रिको धर्मः''**

सीता-रामयोरुभयोः शील-चारित्रयोर्गानं आदि-कविना सर्वत्र मुक्तकण्ठेन कृतम्। मारीचो रावणाय रामस्य गुणान् वर्णयन् गदति। यथा-

**रामो विग्रहवान्धर्मस्साधुस्सत्यपराक्रमः।**
**राजा सर्वस्य लोकस्य देवानामिव वासवः।।**
**वा. रा. ( 3/37/13 )**

रामदूतहनूमाञ्छ्रीरामस्य गुणान् निरूपयन् दैव्यै सीतायै भणति-

**रक्षिता जीवलोकस्य स्वजनस्य च रक्षिता।**
**रक्षिता स्वस्य वृत्तस्य धर्मस्य च परंतपः।।**
**वा. रा. ( 5/35/10 )**

देव्याः सीतायाः शीलम् अभिनन्दयन् वदति-

**इमान्तु शीलसंपन्नां द्रष्टुमिच्छति राघवः।।**
**वा.रा. ( 5/16/22 )**

यः शीलचारित्रसंपन्नो भवति स एव, सत्यव्रतं प्रतिष्ठितं सर्वविधं धर्मं च यथावत्पालयितुं शक्नोति।

**''अधर्मस्य तिरस्कारः''**

वाल्मीकिः सुन्दरकाण्डे अधर्माऽचरणेन उत्पद्यमानं विनाशं बोधयन् तत् तत् पात्रमुखेन कथयति। यथा-

**महोत्पातो अधर्मात्तु भविष्यति हि सांप्रतम्।**
**नैते धर्मं विजानन्ति राक्षसाः पिशिताशनाः।।**
**वा. रा. ( 5/26/34 )**

युद्धकाण्डे माल्यवान् रावणं स्व मधर्मं अवगमयन् बोधयति-

**स प्रमादात् प्रवृद्धस्तेऽधर्मोऽहिर्ग्रसते हि नः।**
**विवर्धयति पक्षं च सुराणां सुरभावनः।।**
**वा.रा. ( 6/35/16 )**

तव प्रमादात् वर्धितोधर्मोऽहिः अस्मान् निगलयितुं इच्छति तथा देवताभिः पालितो धर्मस्तस्य पक्षं वर्धयति।

युद्धकाण्डे माल्यवता धर्माऽधर्मयोः सुन्दरं चित्रणं प्रस्तुतमस्ति। स रावणं सन्धिं कर्तुं प्रेरितवान् किन्तु रावणस्तु रावण एव, तस्य का वार्ता-

**धर्मो वै ग्रसतेऽधर्मं यदा कृतमभूद् युगम्।**
**अधर्मो ग्रसते धर्मं यदा तिष्यः प्रवर्तते।।**
**वा. रा. ( 6/35/14 )**

**''धर्मस्य मूलाधारे सत्यं सत्यं केवलं सत्यम्''**

धर्मस्य सत्यमूलकत्वं सकलश्रेयःप्रापकत्वमपि महर्षिवाल्मीकिः निर्द्वन्द्वं प्रदर्शितवान्। यथा-

**दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च।**
**वेदाः सत्यप्रतिष्ठानास्तस्मात् सत्यपरो भवेत्।।**
**वा.रा. ( 2/109/14 )**

अर्थात् दान-यज्ञ-होम-तपस्या-वेदादीनां सर्वेषाम् आधारः सत्यमेव। अतः सर्वैः सत्यपरायणैः भवितव्यम्। वाल्मीकिरामायणे सत्यस्य महिमागानं कृतमस्ति। कारणं धर्मस्य आधारः सत्यमेवाऽस्ति। यदि मूले सत्यं न स्यात् तर्हि को धर्मः? उक्तञ्च कविना अयोध्याकाण्डे सत्यस्य महिमागाने-

**सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः।**
**सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम्।।**
**वा. रा. ( 2/109/13 )**

महर्षिः वाल्मीकिः सर्वानपि मानवदेहधारिणः स्व-स्वधर्मेण कृत्स्नमिदं वसुधातलं स्वर्गतुल्यं कर्तुं मनुष्यं स्वर्गस्थदेवताभ्योऽपि स्पृहणीयञ्च कर्तुं रामायणस्य विधिधर्माधिष्ठितपात्राणां चरित्रमायध्यमेन रामायण-सहितया प्रेरितवान्। धर्मप्रतिपादकाः ग्रन्थास्तु बहवः सन्ति किन्तु समाजस्य अद्यावधि रामायणे यावच्छ्रद्धा दृश्यते नान्यत्र। श्रद्धायाः मूलं न केवलमादिकाव्यमेव अपितु तत्र आदर्शसमाजनिर्माणाय शिक्षणमस्ति। धर्मरहितसमाजो निश्चयेन विनश्यति तथा धर्मसहितः समाजः सर्वदा जयतीत्यस्य सुन्दरमुदाहरणं रामायण एव दृश्यते।

**शोधच्छात्रः**
**ज.रा.रा.सं.वि.वि., जयपुर**

# गीतरामायण-प्रशस्तिः

**❑ मिश्रोऽमिराजराजेन्द्रः**

**यत्प्रणीतं जगद्देशिकैस्सादरं**
**गीतसीताभिरामाभिधं प्रोज्ज्वलम्।**
**गीतरामायणं भक्तिभावान्वितं**
**तद्धि नक्तन्दिवं गीयतां गीयताम्।। 1।।**

**नव्यवाल्मीकिना धर्मदिग्वर्तिना**
**रामभद्राङ्घ्रिणा साहितीसूरिणा।**
**सत्कृतेनाऽञ्चितं जानकीजानिना**
**गीतरामायणं गीयतां गीयताम्।। 2।।**

**गीतगोविन्दपारम्परीणं महत्**
**कान्तहृद्याऽनवद्यैः पदैर्गुम्फितम्।**
**सद्रसं सद्गुणं रीतिवृत्तिप्रभं**
**गीतरामायणं गीयतां गीयताम्।। 3।।**

**चित्रमेतन्महाकाव्यमौदुम्बर-**
**स्वादसिक्तं कृतं येन भक्त्यर्थिना।**
**नौमि तं शारदामल्लिकाक्षं मुदा**
**तस्य रामायणं गीयतां गीयताम्।। 4।।**

**संविधानं नवं वृत्तगानं नवं**
**छन्दसाञ्चापि नैजं प्रमाणं नवम्।**
**रामभद्रोदितं लोकभद्रङ्करं**
**गीतरामायणं गीयतां गीयताम्।। 5।।**

**लोकरागाश्रितं लोकभावानुगं**
**लोकमर्मास्पदं लोकचित्तस्थितम्।**
**पामराणामपि स्फीतसौख्यप्रदं**
**गीतरामायणं गीयतां गीयताम्।। 6।।**

**नूतनोपक्रमं लोकगीताश्रितं**
**देववाणीसुसामर्थ्यसन्दर्शकम्।**
**प्रातिभं सत्कवीनां यशोवर्धकं**
**गीतरामायणं गीयतां गीयताम्।। 7।।**

**लोकगीतैर्महाकाव्यसङ्कल्पना**
**यस्य जाता कवीन्द्रस्य, साऽप्यादिमा।**
**तं नवाध्वाऽध्वनीनं कविं संस्तुवे**
**तस्य रामायणं गीयतां गीयताम्।। 8।।**

**एष राजेन्द्रमिश्रस्त्रिवेणीकविः**
**स्वीयदीक्षागुरुं रामभद्रं स्तुवन्।**
**संस्तुते पाठकान् प्रीतया वाचया**
**गीतरामायणं गीयतां गीयताम्।। 9।।**

**पूर्वकुलपतिः**
**सनराइज-विला, लोअरसमरहिल, शिमला**

1. चित्रकूटस्थ श्रीमद्रामभद्राचार्येण प्रणीतं गीतरामायणं महाकाव्यमधिकृत्य प्रणीता प्रशस्तिः।

# राजस्थानीय संस्कृतसाहित्ये नव्यप्रयोगाः

❏ रिंकू अग्रवालः

संस्कृतस्य अक्षयज्ञाननिधेः संरक्षणे संस्कृत-लेखकानां नवसृजनात्मकप्रयोगाणां उल्लेखनीय योगदानं वर्तते। यद्यपि विगतेभ्यः अनेकेभ्यः वर्षेभ्यः संस्कृतस्य संरक्षणस्य संवर्द्धनस्य च गौरवमय-परम्परायाः निर्वहनं कुर्वन् राजस्थानस्य संस्कृतलेखकः देवर्षिः श्रीकला-नाथशास्त्री श्रीहरिरामार्चामहोदयः, श्रीमेवारामकटारा-महोदयः, श्रीवैकुण्ठनाथशास्त्रीमहोदयः, श्रीसुभाष-तनेजामहोदयः, श्रीमोहनलालपाण्डेयमहोदयः, श्रीउमेशशास्त्रीमहोदयः, श्रीशिवसागरत्रिपाठीमहोदयः, श्रीपद्मशास्त्रीमहोदयः, श्रीनन्दकिशोरगौतममहोदयः, श्रीवृद्धिचन्दशास्त्रीमहोदयः, श्रीगिरिराजशास्त्रीमहोदयः, डॉ. श्रीमती लक्ष्मीशर्मामहोदया, डॉ. श्रीवसन्तजैटली-महोदयः इत्यादयः प्रयासरताः सन्ति। परन्तु मम शोधविषयस्य कालखण्डः 1975 ईस्वीतः 2000 ईस्वीपर्यन्तं निर्धारितोऽस्ति। यत्र जयपुरसंभागस्य उपर्युक्त विद्वद्भिः क्रियमाणानि विविधानि शोधकार्याणि सम्मिलितानि।

साहित्यस्य समाजस्य च घनिष्ठसम्बन्धः वर्तते। समाजस्य भूतकालस्य सम्पूर्णाध्ययनं साहित्यं विना अपूर्ण वर्तते। भारतदेशस्य भूतकालस्य दिग्दर्शनमपि संस्कृत-साहित्यस्य माध्यमेनैव संभवमस्ति। यतोहि संस्कृतसाहित्यं विविधतया परिपूर्णं वर्तते। लौकिकेः संस्कृतसाहित्येऽपि संस्कृतवाङ्मयस्य विविधानि रूपाणि दृश्यन्ते। यद्यपि तत्र नवीनछन्दसां प्रयोगः गीतानां, ललितनिबन्धानां, ललित कथानां वा प्रयोगः यतोहि एतेषां सर्वेषां प्रयोगः वैदिक साहित्ये दृश्यते। तथा यत्र संस्कृते जनजागृतेः कल्याणभावनायाः च स्वराः सन्ति तत्रैव नाटकानां चलचित्राणां च माध्यमेन आशावादस्य नवसंचारः सर्वत्र दृश्यते। श्रमयुक्ता शौर्ययुक्ता संस्कृतियुक्ता ज्ञानयुक्ता भक्तियुक्ता वीराणां जन्मदात्री च इयं मरूभूमिः चिरकालात् विदुषां कृते वन्दनीया अस्ति। स्वधर्मस्य मानमर्यादायाः स्वदेशस्य गौरवस्य च रक्षार्थं प्राणोत्सर्गं कर्तृणामसंख्यानां वीराणां वीराङ्गनानां च जन्मदात्री इयं भारतभूमिः प्रयागस्य सदृशी परमपावनी शक्तिदायिनी च अस्ति। एतादृश्यां पुण्यसलिलायां वसुन्धरायां पुरातनकालादेव वीणापापोः हंसवाहिन्याः कमलासनायाश्च भगवत्याः शारदाया आराधनस्य परम्परा अनवरतं विद्यमानास्ति। यत्र अनेकैः संस्कृतमनीषिभिः स्वकीयानि श्रद्धासुमनानि समर्पितानि कृतानि। देववाण्याः समाराधनाया अयं क्रमः स्वतंत्रताया अनन्तरमपि अविछिन्नरूपेण दृष्टिगतो भवति। अत्र महाकाव्यस्य खण्डकाव्यस्य गीतिकाव्यस्य गद्यकाव्यस्य च सदृशमेव नाट्यलेखनस्य प्रवृत्तिरपि प्राचीनकालादेव विद्यमानास्ति।

राजस्थानप्रदेशस्य शताधिककाव्यकारैः महाकाव्यं, खण्डकाव्यं, नाटकं, उपन्यासः, कथा, चम्पूकाव्यं, स्तोत्रकाव्यं इत्यादीनां विधानं प्रणयनं कृतम्। अन्यप्रदेशादागत्य राजस्थानस्य वास्तविकस्थितिं स्वीकारकर्तृणां पण्डितानां रचनाकाराणां च माध्यमेन संस्कृतसाहित्यस्य उत्थानाय स्वकीयं अमूल्यं योगदानं कृतम्।

संस्कृतसाहित्यक्षेत्रे ''वाराणसी वा जयपत्तनं वा'' इति कथनस्य वास्तविकश्रेयः श्रीसवाईरामसिंहद्वितीय-महोदयस्य अस्ति। संस्कृते नवसृजनात्मकसाहित्यस्य

विकासे जयपुरस्य त्रयाणां शासकानां योगदानं महत्त्पूर्णं वर्तते। येषु श्रीरामसिंहप्रथममहोदयः श्रीसवाईजयसिंह-द्वितीयमहोदयः श्रीरामसिंहद्वितीयमहोदयः च प्रसिद्धः। एतेषां शासकानां कार्यकालः संस्कृतस्य नवसृजनात्मक साहित्यलेखनस्य स्वर्णयुगं मन्यते। संगीतरत्नाकरः संगीतकल्पद्रुमश्च एतौ ग्रन्थौ अस्य महत्वपूर्ण योगदानं वर्तते। पं. श्रीमधुसूदन ओझा, पं. श्रीसूर्यनारायणशास्त्री, पं. श्रीगिरिधरशर्मा चतुर्वेदी भट्ट श्रीमथुरानाथशास्त्री, श्रीहरिशास्त्री इत्यादीनां लेखकानां अनेकाः रचनाः प्रसिद्धाः।

बहूनि एतादृशानि महाकाव्यानि अपि सन्ति येषु नवसृजित प्रयोगस्य वर्णनं समुचितरूपेण कृतम्। येषु पृथ्वीराजविजयम्, मानप्रकाशम्, ईश्वरविलासम्, जयवंशम्, जयपुरविलासम्, जयपुरवैभवम् च प्रमुखमस्ति।

अतः स्पष्टमस्ति यत् जयपुरसहितं सम्पूर्णराजस्थान-स्य लेखकानामाकर्षकाः नवीनसृजनात्मक प्रयोगाः एव सन्ति।

सम्पूर्ण भारतदेशे ख्यातिप्राप्तलेखकाः चिरकालात् संस्कृतस्य भारतीयसंस्कृतेः च उन्नायकाः संपोषकाः प्रचारकाः प्रसारकाः च सन्ति।

पत्रकारितायाः क्षेत्रेऽपि अत्रत्यानां विदुषां योगदानं सराहनीयं वर्तते। संस्कृतरत्नाकरः संस्कृतभारती स्वरमंगला च एतादृश्यः संस्कृतपत्रिकाः सन्ति यासां प्रकाशनं राजस्थानप्रदेशे प्रतिमासं भवति।

संस्कृताधुनिकलेखनस्य सन्दर्भे सर्गबद्धकथायाः क्रमिकविकासस्य छन्दपरिवर्तनस्य रसानुकूलभाषायाः च प्रयोगः प्रमुखरूपेण क्रियते परन्तु एते सर्वे प्रयोगाः परम्परागताः सन्ति। एतेषु क्षेत्रेषु कतिपयपरिवर्तनमपि अभवत्। यथा नवीनछन्दसां प्रयोगः ललितनिबन्धानां प्रयोगः ललितकथानां प्रयोगश्च। संस्कृतसाहित्य एतादृश्याः रचनाः सन्ति यासु आधुनिकतायाः समावेशः दृश्यते।

संस्कृतस्य वैदकस्वरूपस्य वर्णनं कुर्वति दयानन्द-महाकाव्ये कथितं यत्-

**जयतु जयतु लोके वेदसूर्यप्रकाशो।**
**भवतु भवतु पश्चादार्य धर्मप्रभावः।।**
**नयतु नयतु दूरं न्यायकारी दयालुः।**
**खरतर बहुरोग नूनमात्माधिवासात्।।**

उपर्युक्त पद्यांशे महर्षेः दयानन्दसरस्वतीमहोदयस्य जीवनवृत्तस्याधारे वैदिकधर्मस्य महत्त्वं वैदिकधर्मस्य प्रचारार्थं क्रियमाणप्रयासानां निरूपणं चास्ति।

संस्कृतसाहित्यस्य प्रसिद्धाः गद्यकाराः सुबन्धुः, दण्डीः, बाणभट्टः च सन्ति। यैः रचितं कथाख्यायिका-साहित्यं वर्तमानकालेऽपि प्रचलितमस्ति। अधुना कथाशैल्यां अत्यधिकं परिवर्तनं परिष्कारः च दृश्यते। यतोहि अद्य कथासाहित्ये नूतन प्रयोगाणां प्रयोगः बाहुल्येन क्रियते। व्यावहारिकरूपेण संस्कृतभाषासाहित्यं द्विविधम्-नीतिकथा लोककथा च। आधुनिकरूपेण लिखितासु संस्कृतकथासु चन्द्रमहीपतिः कुसुमुनिचन्द्रा, कुसुमलक्ष्मी, आदर्शरमणी, जीवनस्य पृष्ठद्वयम्, यात्राविलास इत्यादीनां कथानां संस्कृतसाहित्ये विपुलं योगदानं वर्तते। यतोहि एतेषां कथानां लेखकैः स्वकथासु विभिन्नछन्दसां प्रयोगः कृतः। एभिः स्वकथासु गजलपद्धतिः सवैया च धाराप्रवाहरूपे प्रयुक्तम्।

**शोधछात्र**
**ज.रा.रा.सं.वि.वि., जयपुर**

नारी-स्तम्भः

# एकदा-नैमिषारण्ये

❑ डॉ. राजेश्वरी भट्ट

पर्यावरणप्रदूषणं सम्प्रति विश्वस्मिन् विश्वे महद्भयमिवोपस्थितं जातम्। अस्य निवारणाय अन्तरराष्ट्रिय स्तरे पर्यावरणविदः प्रयत्नवन्तो दृश्यन्ते। किन्तु अस्याः समस्यायाः समाधानस्य कृते मानव-मात्रस्य सहयोगोऽपेक्ष्यते। युगेऽस्मिन् जनाः 'तेन त्यक्तेन भुञ्जीथा' इति औपनिषदिकचिन्तनमपेक्ष्य 'यावज्जीवेत् सुखं जीवेत्' इति उपयोगितावादि चिन्तनमनुसरन्तः प्रकृत्या सह मानवस्य सहजं सम्बन्धं विस्मृत्य प्रकृत्याः तत्त्वैः सह तत्र विकृतिं जनयितुं, दोहनञ्च कर्त्तुं कटिबद्धा दृश्यन्ते। आत्मघातिनामेषां धनगृध्नतायां दुश्चेष्टितैः देवमयी प्रकृतिरनुदिनं प्रदूषिता जाता। एवं सति वयं कथं सुखिनः स्याम ? पर्यावरणसंरक्षणाय अस्माभिः वैदिक-जीवनदर्शनस्यानुसरणमनिवार्यमस्ति। अस्मिन् प्रसङ्गे नवनीत पत्रिकायां हिन्दीभाषायां प्रकाशितेयं बोधकथा अत्रोल्लेखनीया वर्तते-

सूत उवाच -

नैमिषारण्ये एकः सुन्दरदेशोऽस्ति। श्रद्धालूनां मनसि तस्य देशस्य सौन्दर्यवर्णनं श्रोतुमौत्सुक्य-मुत्थितम्। प्रभो! तस्य देशस्य विषये वयं श्रोतुमिच्छामः इति सामूहिकस्वरेण श्रोतॄणामभि-लाष आसीत्। सूत उवाच-तस्मिन् देशे सर्वत्र हरीतिमा दृश्यते। प्रतिनगरं रमणीयैरुद्यानैः सुशोभितं वर्तते। अत्र नदीषु प्रवहमानं जलं स्वच्छं प्राणपोषकञ्चास्ति। देशेऽस्मिन् नद्यः जननीव पूज्यन्ते, आरार्तिकया च आराध्यन्ते। गौरत्र मातृवत् पूजनीया मन्यते। अस्य देशस्य निवासिनः स्वाधिकारेण गृहीतायां भूमावेव कृषिकर्म कुर्वन्ति। अतिरिक्तां भूमिं पशूनां कृते आहारविहाराय त्यजन्ति। पावनेऽस्मिन् देशे वृक्षाराधकैर्वृक्षाणां रक्षणं तेषां माहात्म्यश्रवणं महत् पुण्यदं मन्यते। पञ्चभूतानां प्रतिष्ठा देशे सर्वत्र मान्या वर्तते। प्रकृतेर्घटकमात्रे ईश्वरदर्शनं अत्रत्यानां दृढः संस्कारोऽस्ति किमधिकं स्वर्गसुखानि विहाय सर्वे देवाश्च अस्मै रमणीयदेशाय स्पृहयन्ति। इयं कल्याणकरी कथा युगयुगेभ्यः श्रद्धालूनां कृते कल्याणमावहति। कालान्तरे देशस्यास्य महिमानं श्रोतुं केचिद् धर्मिष्ठा आस्तिका नवयुवका देशस्यास्य महिम्नोनं विषये महर्षिं सूतमपृच्छन्। 'भगवन् ! नैमिषारण्ये स्थितस्य तस्य देशस्य कीर्तिकथां श्रावय। सूत उवाच' नैमिषारण्ये एकः सुन्दरदेश आसीत्। इत्युक्त्वा महर्षिः मौनम भजत् (नवनीत पत्रिकातः साभारमुद्धृता) नवनीत पत्रिकायां प्रकाशिता व्यङ्ग्यमयी विचारोत्तेजिका च 'बोधकथा' समाजस्य कृते विचारणीया वर्तते। सम्प्रति अधिकस्याधिकं फलं प्राप्तुं स्वार्थपरायणैः आत्मघातिभिर्जनैः प्रकृतेः अविरतगत्या दोहनं कृतं येन पर्यावरणं असन्तुलितं जातम्। परिणामतः स्वर्गतुल्योऽयं देशो नरकतुल्यः प्रतीयते। अत्रत्या जना युगयुगेभ्यो अश्वत्थः सर्ववृक्षाणाम् तथा वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं शिरसा नमामि इति स्तुति वचनैर्वृक्षेषु ईश्वरस्य निवासं कल्पयित्वा वृक्षान् महत् श्रद्धया पूजयन्ति। विशेषण नार्यो व्रतोत्सवेषु, पर्वसु, नित्यं वा सुखस्य सौभाग्यस्य कृते अश्वत्थ-वट-धातृ-कदली-तुलसी बिल्वादीनां वृक्षाणां दैनिकी पूजां सम्पादयन्ति। एतदतिरिक्तं वृक्षाः सर्वथा

**उपयोगिनः सन्ति एषां पत्राणि-पुष्पाणि-फलानि किमधिकं त्वक्, मूलञ्च मानवहिताय भवन्ति। शास्त्रेषु-वृक्षारोपणं पुण्यदं, स्वर्गदं च कथितम्। किन्तु शास्त्रवचनान्युपेक्ष्य विवेकभ्रष्टैर्जनैः त्वरितगत्या वृक्षाः उच्छिद्यन्ते, अविचार्य एव जलस्यापव्ययः क्रियते येन कूपेषु नदीषु वापीषु च जलस्तरं सततं निम्नतरं जातम्। तीर्थेषु प्रायेण दूषितजलेन तीर्थस्थानेषु तीर्थयात्रिणां कृते धार्मिक स्नानफलं संशयगतं जातम्। ध्वनिप्रदूषणेन वायुप्रदूषणेनापि पर्यावरणं ग्रस्तं दृश्यते। पर्यावरण प्रदूषणस्य सोऽयं क्रमो यदि अवरुद्धो न भविष्यति तर्हि देशस्यास्य दशा महाभारतग्रन्थे वर्णितेन यमलोक-वर्णनेन सदृशी भविष्यति यत्र कृष्णः कथयति-**

**हे युधिष्ठिर ! न तत्र वृक्षच्छाया न तटाकसरोऽपि वा**
**न वाप्यो दीर्घिका वाऽपि न कूपो वा युधिष्ठिर।।**
**न मण्डपं सभा वापि न प्रपा न निकेतनम्।**
**न पर्वतो नदी वाऽपि न भूमेर्विवरं क्वचित्।।**
**न ग्रामो नाश्रमो वाऽपि नोद्यानानि वनानि वा।**
**न किञ्चिदाश्रयस्थानं पथि तस्मिन् युधिष्ठिर।।**
**आश्वमेधिकपर्व**

**स्पष्टमस्ति यत् मानवानां कृते विनाशकं पर्यावरणप्रदूषणं कथमपि वारणीयम्।**

## हिन्दी अनुवाद

पर्यावरण प्रदूषण विश्व में महान् भय के समान बढ़ता जा रहा है। इसके निवारण के लिए अन्तर्राष्ट्रीय स्तर पर पर्यावरण वेत्ता प्रयत्नशील हैं। किन्तु इस समस्या के समाधान के लिए मानवमात्र के सहयोग की आवश्यकता है। वर्तमान में लोग त्यागपूर्वक भोग करो उपनिषद् में वर्णित इस कल्याणकारी चिन्तन की उपेक्षा कर 'जब तक जीओ सुख से जीओ' इस उपभोगवादी चिन्तन का अनुसरण करते हुए मानव के साथ प्रकृति के सहज सम्बन्ध को भूलकर प्रकृति के तत्त्वों को विकृत करने के लिए तथा प्रकृति का दोहन करने के लिए कटिबद्ध हैं। धन लोभी और आत्मघाती व्यक्तियों की दुस्चेष्टाओं से देवमयी प्रकृति निरन्तर प्रदूषित हो रही है। इस स्थिति में हम कैसे सुखी हो सकते हैं ? पर्यावरण के संरक्षण के लिए वैदिक जीवन दर्शनका अनुसरण अनिवार्य है। इस प्रसङ्ग में नवनीत पत्रिका में हिन्दी भाषा में प्रकाशित प्रस्तुत 'बोधकथा' यहाँ उल्लेखनीया है-

**सूत जी बोले :-**

नैमिषारण्य में एक सुन्दर देश है। श्रद्धालुओं के मन में उस देश के सौन्दर्य वर्णन को सुनने की उत्सुकता जाएगी। 'प्रभु ! इस देश के विषय में हम सुनना चाहते हैं।' सामूहिक स्वर में श्रोताओं की यही अभिलाषा थी। सूत जी बोले - उस देश में सर्वत्र हरियाली है। देश का प्रत्येक नगर आकर्षक उद्यानों से सुशोभित है। यहाँ की नदियों में प्रवाहित होता जल अमृत सा निर्मल और प्राणों को पुष्ट करने वाला है। यहाँ के निवासी नदियों को माता के रूप में पूजते हैं। उनकी आरती उतारते हैं। गौ को वे अपनी जननी के समान मान देते हैं। अपने स्वामित्व की आधी भूमि पर ही वे उलट-पलट कर कृषि करते हैं। शेष भूमि पशुओं के चरने के लिए छोड़ दी जाती है। यहाँ हरे वृक्षों की कटाई प्रतिबन्धित हैं, उनकी रक्षा करने और माहात्म्य सुनने का भी विधान है। पञ्चमहाभूतों की प्रतिष्ठा है। प्रकृति के घटकों में ही ईश्वर के दर्शन किये जाते हैं। स्वर्ग के सुख और देवता भी ईर्ष्या करे ऐसा मानोरम है यह देश। कथा सुनाई जाती रही पीढियों तक श्रोता तृप्त होते रहे। कालान्तर में अपने पूर्वजों से इस देश का वर्णन

सुनने वाली नयी पीढ़ी ने उत्सुकता से सूतजी से इस देश के विषय में पूछा जिस पर 'नैमिषारण्य में एक सुन्दर देश था।' इतना कहकर महर्षि मौन हो गये। (नवनीत पत्रिका) से साभार। नवनीत पत्रिका में प्रकाशित व्यंग्यमयी विचारोत्तेजिका यह बोध-कथा समाज के लिए विचारणीया है। वर्तमान में स्वार्थपरायण आत्मघाती व्यक्तियों के द्वारा प्रकृति का अत्यधिक दोहन किया जा रहा हैं। जिससे पर्यावरण असन्तुलित हो रहा है। परिणामस्वरूप स्वर्ग के समान यह देश नरक जैसा प्रतीत हो रहा है। इस देश के निवासी युगयुगों से "मै वृक्षो में पीपल हूँ" तथा वटवृक्ष के पत्ते पर शयन करने वाले भगवान बालमुकुन्द को शिर से नमन करता हूँ इन स्तुति वचनो से वृक्षो में ईश्वर का निवास मानकर इनकी पूजा करते हैं। विशेषरूप से यहाँ की नारियाँ व्रत, उत्सव पर्व एवं नित्य ही वट-पीपल-आँवला, केला-तुलसी बिल्व आदि वृक्षों की पूजा करती हैं। इसके अतिरिक्त वृक्ष सर्वथा उपयोगी हैं इनके पत्ते-फूल-फल, जड़ एवं छाल भी मानव के लिए उपयोगी हैं। किन्तु शास्त्र के मंगलमय वचनों की उपेक्षा कर विवेक भ्रष्ट जन वृक्षों को काट रहे हैं। बिना विचार किए जल का अपव्यय करते हैं। अतः कूप, नदी, बावड़ी आदि का जल स्तर घटता जा रहा है। तीर्थों में स्थित दूषित जल के कारण तीर्थस्थानों में तीर्थयात्रियों का धार्मिक स्नान संशय में पड़ गया है। ध्वनि प्रदूषण वायु प्रदूषण से भी पर्यावरण अत्यधिक ग्रस्त है। पर्यावरण प्रदूषण का यह सतत क्रम यदि अवरुद्ध नहीं हुआ तो शीघ्र ही इस देश की दशा महाभारत में वर्णित यमलोक के मार्ग के समान हो जायेगी जिसके विषय में भगवान् कृष्ण कह रहे हैं -

हे युधिष्ठिर- इस मार्ग में न वृक्षों की छाया है न तालाब, पोखर एवं बावड़ी है और न कुआँ है। उस मार्ग में न कोई मण्डप, बैठक, प्याऊ, घर, पर्वत, नदी, गुफा, गाँव, आश्रम , बगीचा अथवा सराय भी नहीं है। स्पष्ट है कि मानवता के लिए विनाशक पर्यावरण प्रदूषण किसी भी प्रकार रोकना चाहिए।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

# निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.- 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

**नाम................................. ...........पुत्र/पुत्री श्री............................भवन संख्या..........**

**गली/ मोहल्ला/कॉलोनी.................................वाया/पोस्ट ऑफिस...................................**

**तहसील...............................जिला.......................राज्य....................................**

**देश..................पिन.......................................दूरभाष.......................................**

**मोबाईल नं............................ईमेल...................................................................**

**निवेदक सुदामा शर्मा, प्रबन्ध सम्पादक**

**भारती संस्कृत मास पत्रिका**

**बी-15, भारती भवन, न्यू कॉलोनी, जयपुर-302001 (राज.) दूरभाष-2379014**

**ई-मेल - sanskritbharti09@gmail.com**

आयुर्वेद-स्तम्भः

# शंखपुष्पी सरा मेध्या

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**संहिताकालत एव रसायनस्वरूपिण्याः शंखपुष्प्याः प्रयोगः प्रचलितो वर्तते। निघण्टुष्वस्याः पर्याप्तं वर्णनमस्ति। भावप्रकाशनिघण्टौ त्वस्याः निम्नलिखितानि नामानि सन्ति, यथा-**

**शंखपुष्पी तु शंखाह्वा माङ्गल्यकुसुमापि च।**
**( भ्र.प्र.नि. गुडूच्यादिवर्गः )**

**अन्येषु निघण्टुष्वप्यस्याः बहूनि नामान्युल्लिखितानि सन्ति। तेषां सर्वेषामत्रैकत्ररूपेणोल्लेखः क्रियते, यथा-**

**कम्बुपुष्पी, कम्बुमालिनी, किरीटी, चिरिण्टी, तिलकी, भूलग्ना, मनोरमा, मेध्या, शिवब्राह्मी सितपुष्पी, स्मृतिहिता इत्यादीनि। अन्यान्यपि बहूनि नामानि सन्ति, किन्तु न तेषां सर्वेषामुल्लेखोऽत्रावश्यकः।**

संहिताकाल से ही रसायनस्वरूप वाली शंखपुष्पी का प्रयोग प्रचलित है। आयुर्वेदीय निघण्टुओं में इसका पर्याप्त वर्णन है। भावप्रकाश-निघण्टु में तो इसके निम्नलिखित नाम हैं, जैसे –

शंखपुष्पी, शंख के नामवाली (शंख के जितने नाम हैं वे सभी इसके नाम हैं, उनके आगे पुष्पी लगाना पडेगा) एवं माङ्गल्य कुसुमा।

अन्य निघण्टुओं में भी इसके बहुत से नाम उल्लिखित हैं। उन सब का यहाँ एक जगह ही उल्लेख किया जा रहा है-

कम्बुपुष्पी, कम्बुमालिनी, किरीटी, चिरिण्टी, तिलकी, भूलग्ना, मनोरमा, मेध्या, शिवब्राह्मी, सितपुष्पी, स्मृतिहिता इत्यादि। अन्य भी बहुत से नाम हैं, लेकिन उन सबका उल्लेख यहाँ आवश्यक नहीं है।

**यद्यपि शंखपुष्पी विशेषेण मेध्या वर्तते पुनरप्यस्याः सरत्वमपि निघण्टुकारैः प्राथमिक-रूपेण निदर्शितम्। भावप्रकाशनिघण्टुकारः अस्याः वर्णन क्रमे कथयति, यत्-**

**शंखपुष्पी सरा मेध्या वृष्या मानसरोगहृत्।।**
**रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा।**
**दोषापस्मारभूताश्री कुष्ठक्रिमिविषप्रणुत्।**
**( भा. प्रकाशनिघण्टुः )**

**अन्येषु निघण्टुष्वपि यत् सरत्वं प्रोक्तं तत् संक्षेपेणोल्लिख्यतेऽत्र –**

**शंखपुष्पी सरा मेध्या...... ( मदनपालनिघण्टुः )**
**शंखपुष्पी सरा मेध्या.... ( सोढलनिघण्टुः )**
**शंखपुष्पी सरा स्वर्या..... ( कैयदेवनिघण्टुः )**

**अनेन स्पष्टीभवति यत् शंखपुष्पी यथा प्रमुखरूपेण मेध्या वर्तते तथैव सरत्वमप्यस्यां सुप्रतिष्ठितं वर्तते। अन्येऽपि गुणास्त्वत्र श्रेष्ठरूपेण विराजन्तेऽस्मादेव हि कारणादेषा रसायनी वर्तते।**

यद्यपि शंखपुष्पी विशेष रूप से बुद्धि के लिए हितकारी है फिर भी इसका सरत्व (मल-प्रवर्तन कराने वाली होना) भी निघण्टुकारों ने प्राथमिकरूप से बताया है। भावप्रकाश-निघण्टुकार इसके वर्णनक्रम में कहते हैं कि-

शंखपुष्पी सर (मलनिःसारक), मेधा के लिए हितकारी, वृष्य (वाजीकरण, पुंस्त्वशक्तिवर्धक), मानस रोगों को दूर करने वाली, रसायन गुणवाली, कषाय रस

वाली, उष्णवीर्य, स्मृति-कान्ति-बल और अग्नि को बढाने वाली, दोष-अपस्मार-भूत-अलक्ष्मी-कुष्ठ-क्रिमि और विष को नष्ट करने वाली है। (भा.प्र.नि.)

अन्य निघण्टुओं में भी जो सरत्व कहा गया है उसका यहाँ संक्षेप में उल्लेख किया जा रहा है-

शंखपुष्पी सरगुणयुक्त और मेधा के लिए हितकारी है। (मदनपाल नि., सोढल नि.)

शंखपुष्पी सरगुणयुक्त और स्वर के लिए हितकारी है। (कैय. नि.)

इससे स्पष्ट होता है कि शंखपुष्पी जिस प्रकार से प्रमुख रूप से मेध्या है उसी तरह से इस में सरत्व गुण भी होता है। और भी गुण इसमें उत्कृष्ट रूप से स्थित होते हैं इसलिए ही यह रसायन स्वरूप वाली होती है।

**शंखपुष्पी विशेषेण मेध्या वर्तते। मेधायाः व्यवस्थितीकरणेऽविकृतस्य पित्तस्य कार्मुकत्वं वर्तते। आयुर्वेदीयमतानुसारेणाचार्यः चरकः कथयति-**

**प्रभा प्रसादो मेधा च पित्तकर्माविकारजम्।**
**(च.सू. 18/50)**

**विरेचनेन विकृतस्याधिकवृद्धस्य वा पित्तस्य निर्हरणं भूत्वा पित्तमविकारिरूपेण तिष्ठति। शंखपुष्पी स्वस्य सरत्वेन पित्तस्याधिकस्य निर्हरणं कृत्वा तत् प्रकृतौ स्थापयत्यतएव प्रभावात्तु, शंखपुष्पी मेध्या वर्तते एव, गुणत्वेनापि मेधाभिवर्धिका भवति। यतो ह्यविकृतं करोति पित्तमेषा, प्राकृतं तु पित्तं मेधाभिवर्धकं वर्तते। अस्या अन्ये गुणास्तु भावप्रकाशनिघण्टुवचनेनोपरि प्रोक्ताः, पुनरपि सर्वैः निघण्टुकारैः ये ये गुणाः प्रोक्ताः तेषां पृथक्-पृथक् रूपेणोल्लेखमकृत्वात्रैकत्र स्वरूपे एव उल्लेखः क्रियते।**

शंखपुष्पी विशेषरूप से मेध्या है। मेधा को व्यवस्थित करने में पित्त की कार्मुकता होती है। आयुर्वेद के मतानुसार आचार्य चरक कहते हैं कि-

कान्ति, प्रसाद (शरीर में आन्तरिक रूप से निर्मलता), और मेधा ये अविकृत पित्त के कर्म हैं।

विरेचन (सरत्व) से विकृत या अधिक पित्त का निर्हरण होकर (शरीर में) पित्त अविकारी रूप से स्थित हो जाता है। शंखपुष्पी अपने सरत्व गुण के कारण अधिक पित्त का निर्हरण करके उस पित्त को प्राकृतरूप से स्थापित कर देती है, इसलिए शंखपुष्पी प्रभाव में मेध्या होती ही है गुण के कारण भी मेधा को बढाने वाली होती है। चूंकि यह पित्त को अविकृत करती है और प्राकृत (अविकृत) पित्त मेधा को बढाने वाला होता ही है। इसके अन्य गुण तो भावप्रकाश निघण्टु के कथनानुसार ऊपर कह दिये गए है, फिर भी सब निघण्टुकारों के द्वारा जो-जो गुण कहे गए हैं, उन सब का पृथक्-पृथक् रूप से उल्लेख न करके यहाँ एकत्र स्वरूप में ही उल्लेख किया जा रहा है।

**रसे तिक्ता कषाया कट्वी त्वेषा गुणेषु किञ्चित् स्निग्धा वर्तते। वीर्ये तूष्णामेनां राजनिघण्टुकारस्तु 'हिमा' इति कथयति तथा कैयदेवनिघण्टुकारस्त्व-नुष्णेति निगदति। विपाके रसानुसारे तु कटुविपाक एवापतति, प्रभावे तु निश्चितरूपेण मेध्या भवति।**

**कर्मक्रमे त्वेषा सरा, मेध्या, रसायनी, स्वर्या, स्मृतिदा, कान्तिबलप्रदा, मूत्रला, दीपन-पाचनी, हृद्या च वर्तते। रोगविनाशनक्रमे तु शंखपुष्पी मोहनाशिनी, अनिद्राघ्नी (निद्राकारिणी), उन्मादाप-स्मारार्शः- कुष्ठमूत्रकृच्छ्राग्निमान्द्यानाह-ज्वरदाहविनाशिनी त्वेषोच्चरक्तचापनामकं रोगं**

**नियन्त्रयति। न केवलमुच्चरक्तचापं नियन्त्रयत्यपितु तस्य निम्नतामापादयत्यत एव ये हि निम्नरक्तचापवन्तः स्युस्तैरस्य प्रयोगः न करणीयः, निषिद्धा ह्येषा तेभ्यः।**

रस में तिक्त, कषाय और कटु यह शंखपुष्पी गुणों में कुछ स्निग्ध होती है। वीर्य में तो उष्ण स्वरूप वाली इसको राजनिघण्टुकार तो हिम (शीतवीर्य) कहते हैं तथा कैयदेवनिघण्टुकार तो इसे अनुष्णा कहते हैं। विपाक में तो रस के अनुसार कटुविपाक ही होता है। प्रभाव में तो यह निश्तिच रूप से मेध्या है। कर्म के क्रम में तो यह सरा (किञ्चित् विरेचक), मेध्या, रसायनी, स्वर के लिए हितकर, स्मृति बढाने वाली, कान्ति और बल प्रदान करने वाली, मूत्र लाने वाली, दीपन और पाचन करने वाली तथा हृदय के लिए हितकर है। रोग को नष्ट करने के क्रम में तो शंखपुष्पी मोह को नष्ट करने वाली, अनिद्रा को दूर करने वाली (निद्रा लाने वाली), उन्माद, अपस्मार, अर्शोरोग, कुष्ठ, मूत्रकृच्छ्र, अग्निमान्द्य, आनाह (पेट में तनाव), ज्वर, दाह को नष्ट करने वाली यह उच्च रक्तचाप नामक रोग का भी नियन्त्रण करती है। यह केवल उच्च रक्तचाप का नियन्त्रण ही नहीं करती अपितु इसको नीचे भी लाती है, इसलिए जो निम्न रक्तचाप वाले है, उनके द्वारा इसका प्रयोग नहीं किया जाना चाहिए, उनके लिए यह निषिद्ध है।

**सरादीनां कर्मणां प्राप्त्यर्थं सर्वेषां मोहानिद्रादि-रोगाणां विनाशार्थं चास्याः कल्करूपे प्रयोगः करणीयः, कल्कप्रयोगस्य विधिस्तु पूर्वस्मिन् लेखे प्रतिपादितः। अस्याः स्वरसेऽपि कार्मुकत्वं वर्तते। अतः ये कल्कस्वरूपेऽस्याः प्रयोगम् नेच्छन्ति तैरस्याः स्वरसः पातव्यः। यद्यपि कार्मुकत्वं तु विशेषेण कल्क एव प्रतिष्ठितं भवति किन्तु ये कल्कद्विषः स्वरसप्रियाश्च सन्ति तैरस्याः प्रयोगः स्वरस-क्वाथ-शीतकल्पनाभिः करणीयः। यतो हि न चात्यर्थं द्विष्टभेषजस्य प्रयोग इष्यते, तत्क्षणवमना-रुच्यादिदोषकर्तृत्वात्। चूर्णं तु कल्ककल्पना-यामेवान्तर्भावनीयमत एव ये कल्कस्यार्द्रस्य ग्रहणेऽसमर्थाः सन्ति तैश्चूर्णं ग्रहणीयम्। अत्र केचित् प्रयोगाः प्रस्तूयन्ते-**

**- अस्याः स्वरसस्य मात्रा 10 मि.लि.तः 20 मि. लि. परिमिता वर्तते।**

**- कल्कोऽप्येतावत्यां मात्रायामेव ग्राह्यः।**

**- उन्मादे मूत्रकृच्छ्रे चास्याः स्वरसः परमोपयोगी वर्तते।**

**- आनाहे विबन्धे चास्याः चूर्णस्य प्रयोगः फलप्रदोऽस्ति।**

**- ज्वरे त्वस्याः फाण्टस्वरूपे प्रयोगः सुखावहः।**

**- गुडूच्यपामार्गविडङ्गशङ्खिनी**
**वचाभयाकुष्ठ शतावरी समा।**
**घृतेन लीढा प्रकरोति मानवं**
**त्रिभिर्दिनैः श्लोकसहस्रधारिणम्।।**
**(भै. रत्नावली, रसायनाधि-कार)**

**- आचार्येण सुश्रुतेन कुमाराणां कृते चत्वारः प्राशाः अभिहिताः, यथा हि-**

**चत्वारोऽभिहिताः प्राशाः श्लोकार्धेषु चतुर्ष्वपि।**
**कुमाराणां वपुर्मेधाबलबुद्धिविवर्धनाः।।**
**(सु.शा. 10/70)**

**तेष्वेकस्मिन् योगे शङ्खपुष्प्यप्यभिहिता। एतेषु चतुर्षु योगेषु कस्यचिदप्येकस्य योगस्य प्रयोगः करणीयः शङ्खपुष्पीयुक्तस्तु योग एषः वर्तते, यथा मत्स्याक्षकः शङ्खपुष्पी मधुसर्पिः सकाञ्चनम्। (सु.शा. 10/68)**

**योगेऽस्मिन् स्वर्णभस्मस्यापि संयुक्तता वर्ततेऽत**

**एव चिकित्सकस्य परामर्शं विनाऽस्य योगस्य प्रयोगः न करणीयः। अत्र तु केवलमस्मादेव कारणादुल्लिखितं यत् कुमाराणां, कृते वपुर्मेधाबलबुद्धिविवर्धनार्थं शंखपुष्पीप्रयोगः श्रेष्ठो भवति। अन्येषां कृते त्वस्त्येव।**

सर आदि कर्मों की प्राप्ति के लिए और मोह-अनिद्रा आदि रोगों का विनाश करने के लिए इस का कल्क (ताजा को पीस कर चटनी की तरह) रूप में प्रयोग करना चाहिए, कल्क प्रयोग की विधि तो (शंखपुष्पी के सम्बन्ध में लिखे गए) पहले के लेख में बता दी गई है। इसके स्वरस में भी कार्मुकता है। इसलिए जो लोक कल्क स्वरूप में इसका प्रयोग नहीं करना चाहते हैं उन्हें इसका स्वरस पीना चाहिए। यद्यपि इसकी कार्मुकता तो विशेषरूप ये कल्क में ही होती है, किन्तु जो कल्क से द्वेष करने वाले हैं और स्वरस को पसन्द करते हैं, उन्हें इसका प्रयोग स्वरस-क्वाथ और शीत (हिम) कल्पनाओं के रूप में करना चाहिए। क्योंकि जिस भेषज से अत्यन्त द्वेष करते हैं उसका प्रयोग ठीक नहीं रहता है, क्योंकि वह उसी क्षण वमन, अरुचि आदि दोष करने वाली होती है। चूर्ण तो कल्क कल्पना में ही समाविष्ट हो जाता है, इसलिए जो गीले कल्क को लेने में असमर्थ हैं, उन्हें तो चूर्ण ही लेना चाहिए। यहाँ कुछ प्रयोग प्रस्तुत किए जा रहे हैं -

- इसके स्वरस की मात्रा 10 मि.लि. से 20 मि.ली. है।
- इसका कल्क भी इतनी ही मात्रा में लेना चाहिए।
- उन्माद में और मूत्रकृच्छ्र में इसका स्वरस परमोपयोगी है।
- आनाह में और विबन्ध (कब्ज) में इसके चूर्ण का प्रयोग फलदायी है।
- ज्वर में इसका फाण्टस्वरूप में प्रयोग सुखकारक है।
- भैषज्य-रत्नावली में कहा गया है कि- गिलोय, अपामार्ग, विडङ्ग, शंखपुष्पी, वचा, हरड़, कूठ, शतावरी ये सभी समभाग लेकर चूर्ण बनाकर घी से (3 ग्राम की मात्रा में) चाटने पर मनुष्य को तीन दिन में ही सहस्रश्लोक याद करने वाला बना देता है (यह अतिशयोक्ति है पर नियमित रूप से लेने पर स्मृतिबल प्रदान करने वाला योग है।)
- आचार्य सुश्रुत ने बालकों के लिए चार प्राश (अवलेह) बताए हैं- यथा

चार श्लोकार्धों में बालकों के शरीर, मेधा, बल और बुद्धि बढाने वाले चार प्राश (अवलेह )कहे गए हैं।

इनमें एक योग में शंखपुष्पी भी कही गई है। इनचारों योगों में से किसी भी एक योग का प्रयोग करना चाहिए। शङ्खपुष्पीयुक्त योग यह है -

मत्स्याक्षक (मछेछी), शंखपुष्पी, शहद, घी एवं स्वर्णभस्म। (इसकी मात्रा चिकित्सक के परामर्शानुसार लेनी चाहिए)

इस योग में स्वर्णभस्म की भी संयुक्तता है अतः चिकित्सक के परामर्श के बिना इस योग का प्रयोग नहीं करना चाहिए। यहाँ तो केवल इसीलिए उल्लिखित कर दिया गया है कि बालकों के लिए शरीर, मेधा, बल और बुद्धि बढाने के लिए भी शंखपुष्पी का प्रयोग श्रेष्ठ होता है। औरों के लिए तो इसका प्रयोग श्रेष्ठ है ही।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

**छत्त एक, लाभ अनेक**

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
**पाञ्चजन्य**

(English) Weekly
**ORGANISER**

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,